
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः


कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र M255 विषय वैदिक
नाव. ब्राह्मण (द्वितीय अष्टक) (MSS).
लेखक/लिपीकार अनंत देवधर
पृष्ठ 104 काळ शके 1709 पूर्ण/अपूर्ण

श्रीगणेशायनमः॥ ॥हरिः ओम्॥ ॥अंगिरसो वसत्र-
त॥ तेषांपृश्निघर्मधुगासीत्॥ सर्जीषेणाजीवत्॥ तेब्रुव-
न्निमेनुसत्रमास्महे॥ यस्याओषधीर्नजनयामइति॥ तेदिवो-
वृष्टिमसृजंत॥ यावंतस्तोकाअवापद्यंत॥ तावतीरोषधयो-
यंत॥ ताजाताःपितरोविषेणालिंपन्॥ १॥ तासांजग्ध्वा-
रुंधेत्॥ तेब्रुवन्॥ कइदमित्थमकरितिति॥ वयंभागधेयमिछमा-
नाइतिपितरोब्रुवन्॥ किंवोभागधेयमिति॥ अग्निहोत्रएव
नोप्यस्त्वित्यब्रुवन्॥ तेभ्यएतद्भागधेयंप्रायछन्॥ यद्धुत्वानि
मार्ष्टि॥ ततो वै त ओषधीरस्वदयन्॥ यएवंवेद॥ २॥ स्वदंते

आसंगवंमात्रासहचराणीति॥ तस्मोद्धुतंजातंदरवाचीर्नदुहंति॥ १

स्मा ओषधयः॥ तेवत्समुपावासृजन्॥ इदंनोहव्यंप्रदापयेति॥
सोब्रवीद्वरंवृणे॥ दशोमारात्रीर्जातंनदोहन्॥ आसंगवंमात्रास
हचरति॥ वारेवृतंह्यस्य॥ तस्माद्धुत्सं॰ सं॰ सृष्टधय॰ रुद्रोघा
तुकः॥ अतिहिसंधांधयति॥ ३॥ अग्निपन्वेदघातुकएकंच॥
॥ १॥ प्रजापतिरग्निमसृजत॥ तंप्रजाअन्वसृज्यंत॥ तम
उपास्त॥ सोस्यप्रजाभिरपाक्रामत्॥ तमवरुरुत्समाने
त्॥ तमवरुधंनाशक्नोत्॥ सतपोतप्यत॥ सोग्निरुपा
तातापिवैस्यप्रजापतिरिति॥ सररायाइदमृष्ट॥ १
छलमभवत्॥ तस्माद्यस्यदक्षिणतः केशा...ः।

ब्रा०द्वि०
२

ष्वलक्ष्मीप्राजापत्येलोकः॥ यद्दूराद्दुदमृश॥ तस्माद्दूराद्दृके
संति॥ तदग्नोप्रागृह्णात्॥ तद्व्यचिकित्सत्॥ जुहवानी३मा
मिति॥ तद्विचिकित्सायैजन्म॥ यएवंविद्वान्विचिकित्सति॥ २॥
सीयएवचेतयते॥ तंवागभ्यवदज्जुहुधीति॥ सोब्रवीत्॥ क
मसीति॥ स्वैवतेवागित्यब्रवीत्॥ सोजुहोत्स्वाहेति॥ तत्स्वाहा
रस्यजन्म॥ यएवंस्वाहाकारस्यजन्मवेद॥ करोतिस्वाहाकारे
णवीर्यं॥ यस्यैवंविदुषःस्वाहाकारेणजुह्वति॥ ३॥ भोगायैवा
स्यहुतंभवति॥ तस्याआहुत्यैपुरुषमसृजत॥ द्वितीयमजुहोत्॥
सोश्वमसृजत॥ तृतीयम जुहोत्॥ सगामसृजत॥ चतुर्थमजु

सां०
२

होत्॥ सोविमसृजत॥ पंचमम जुहोत्॥ सोजामसृजत॥ ४॥ सोग्नि
रबिभेत्॥ आहुतीभिर्वैमाप्नोतीति॥ सप्रजापतिंपुनःप्राविशत्॥ तं
प्रजापतिरब्रवीत्॥ जायस्वेति॥ सोब्रवीत्॥ किंभागधेयमभिजान
ष्यइति॥ तुभ्यमेवेदंहूयाताइत्यब्रवीत्॥ सएतद्भागधेयमभ्यजाय
त॥ यदग्निहोत्रं॥ ५॥ तस्मादग्निहोत्रमुच्यते॥ तद्धूयमानमादित्यो
ब्रवीत्॥ माहौषीः॥ उभयोर्वैनावेतदिति॥ सोग्निरब्रवीत्॥ कथंनौ
होष्यंतीति॥ सायमेवतुभ्यंजुहवन्॥ प्रातर्मह्यमित्यब्रवीत्॥ तस्मा
दग्नयेसायंहूयते॥ सूर्यायप्रातः॥ ६॥ आग्नेयीवैरात्रिः॥ ऐंद्रमह
हः॥ यदनुदितेसूर्येप्रातर्जुहुयात्॥ उभयमेवाग्नेयंस्यात्॥ उदि

ब्रा०द्वि०१
२

तेसूर्ये प्रातर्जुहोति ॥ तथाग्नये सायꣳ हूयते ॥ सूर्याय प्रातः ॥ रात्रिं वा अ-
नु प्रजाः प्रजायन्ते ॥ अह्ना प्रतितिष्ठन्ति ॥ यत्सायं जुहोति ॥ ७ ॥ प्रैव ते-
न जायते ॥ उदिते सूर्ये प्रातर्जुहोति ॥ प्रत्येव तेन तिष्ठति ॥ प्रजापति-
रकामयत प्रजायेयेति ॥ स एतदग्निहोत्रं मिथुनमपश्यत् ॥ तदु-
दिते सूर्ये जुहोत् ॥ यजुषान्यत् ॥ तूष्णीमन्यत् ॥ ततो वै स प्राजाय-
त ॥ यस्यैवं विदुष उदिते सूर्येऽग्निहोत्रं जुह्वति ॥ ८ ॥ प्रैव जायते ॥
अथो यथा दिवा प्रजानन्नेति ॥ तादृगेव तत् ॥ अथो खल्वाहुः ॥ य-
स्य वै द्वौ पुण्यौ गृहे वसतः ॥ यस्तयोरन्यꣳ राधयत्यन्यन्न ॥ उभौ वा-
व स न्ता वृच्छतीति ॥ अग्निं वावादित्यः सायं प्रविशति ॥ तस्मादग्नि-

सांबू
२

र्दूरान्नक्तं ददृशे ॥ उभे हि तेजसी संपद्येते ॥ ९ ॥ उद्यन्तं वावादि-
त्यमग्निरनुसमारोहति ॥ तस्माद्धूम एवाग्नेर्दिवा ददृशे ॥ यदग्न-
ये सायं जुहुयात् ॥ आसूर्याय वृश्च्येत ॥ यत्सूर्याय प्रातर्जुहुया-
त् ॥ आग्नेये वृश्च्येत ॥ देवताभ्यः समदं दध्यात् ॥ अग्निर्ज्यो-
तिर्ज्योतिः सूर्यः स्वाहेत्येव सायꣳ होतव्यं ॥ सूर्यो ज्योतिर्ज्यो-
तिरग्निः स्वाहेति प्रातः ॥ तथोभाभ्याꣳ सायꣳ हूयते ॥
उभाभ्यां प्रातः ॥ न देवताभ्यः समदं दधाति ॥ अग्निर्ज्योतिरि-
त्याह ॥ अग्निर्वै रेतोधाः ॥ प्रजा ज्योतिरित्याह ॥ प्रजा एवा-
स्मै प्रजनयति ॥ सूर्यो ज्योतिरित्याह ॥ प्रजास्वेव प्रजाता-

ब्रा०द्वि०
४

सुरेतो दधाति॥ ज्योतिरग्निः स्वाहेत्याह॥ प्रजाएव प्रजाता अस्यां प्रतिष्ठा-
पयति॥ ११॥ तूष्णीमुत्तरामाहुतिं जुहोति॥ मिथुनत्वाय प्रजात्यै॥ उद्
दिते सूर्ये प्रातर्जुहुयात्॥ यथातिथये प्रद्रुताय शून्यायावसथायाहा-
र्यं हरंति॥ तादृगेव तत्॥ क्वाह ततस्त इत्याहुः॥ यस्स न वेद॥ य-
स्मै तद्धरंतीति॥ तस्माद्यदोषसं जुहोति॥ तदेव संप्रति॥ अथो यथा प्रा-
र्थमोषसं परिवेवेष्टि॥ तादृगेव तत्॥ १२॥ अमृष्टविच्चिकित्सति
जुहुत्यु जामसृजताग्निहोत्रं सूर्याय प्रातर्जुहोति जुह्वति संपद्य-
तेद्भ्य तेस्थापयति संप्रतिहूत॥ २॥ रुद्रो वा एषः॥ यदग्निः॥ पत्नी
स्थाली॥ यन्मध्येग्नेरधिश्रयेत्॥ रुद्राय पत्नीमपिदध्यात्॥ प्रमा

मांव
४

युकास्यात्॥ उदीचोंगारान्निरूह्याधिश्रयति॥ पत्नियै गोपीथाय॥ व्यंतान्
करोति॥ तथापत्न्यप्रमायुका भवति॥ १॥ घर्मो वा एषो शांतः॥ अहरहः प्र
वृज्यते॥ यदग्निहोत्रं॥ प्रतिषिंचेत्पशुकामस्य॥ शांतमिव हि पशव्यं॥
न प्रतिषिंचेद्ब्रह्मवर्चसकामस्य॥ समिद्धमिव हि ब्रह्मवर्चसं॥ अथो
खलु॥ प्रतिषिच्यमेव॥ यत्प्रतिषिंचति॥ २॥ तत्पशव्यं॥ यज्जुहोति॥
तद्ब्रह्मवर्चसि॥ उभयमेवाकः॥ प्रच्युतं वा एतदस्माल्लोकात्॥ अग-
तं देवलोकं॥ यच्छृतं हविरनभिघारितं॥ अभिद्योतयति॥ अभ्ये-
नद्धारयति॥ अथो देवत्रैवैनद्गमयति॥ ३॥ पर्यग्निकरोति॥ रक्ष-
सामपहत्यै॥ त्रिः पर्यग्निकरोति॥ त्र्यावृद्धि यज्ञः॥ अथो मेध्यत्वाय॥

यत्प्राचीनमुद्वासयेत्॥ यजमानᳪ शुचार्पयेत्॥ यद्दक्षिणा॥ पितृदेवत्यः
स्यात्॥ यत्प्रत्यक्॥ ४॥ पत्नीᳪ शुचार्पयेत्॥ उदीचीनमुद्वासयति॥ ए
षा वै देवमनुष्याणाᳪ शांता दिक्॥ तामेवैनमनूद्वासयति शांत्यै॥ [illegible]
र्मकरोति॥ यज्ञस्य संतत्यै॥ निष्टपति॥ उपैव तत्स्तृणाति॥ चतुरुन्नय
ति॥ चतुष्पादः पशवः॥ ५॥ पशूनेवावरुंधे॥ सर्वान्पूर्णानुन्नयति॥
सर्वे हि पुण्या राद्धाः॥ अनूचः उन्नयति॥ प्रजाया अनूचीनत्वाय॥ अनू
च्येवास्य प्रजार्धुका भवति॥ संमृशति व्यावृत्त्यै॥ नाहोष्यंनुपसादयेत्॥
यदहोष्यन्नुपसादयेत्॥ यथान्यस्मा उपनिधाय॥ ६॥ अन्यस्मै प्रय
च्छति॥ तादृगेव तत्॥ आस्मै वृश्च्येत॥ यदेव गार्हपत्येऽधिश्रयति॥ ते

न गार्हपत्यं प्रीणाति॥ अग्निरबिभेत्॥ आहुतयो मात्येष्यंतीति॥ स एताᳪ
समिधमपश्यत्॥ तामाधत्त॥ ततो वा अग्नावाहुतयोऽध्रियंत॥ ७॥ यदेनᳪ
समयच्छत्॥ तत्समिधः समित्वं॥ समिधमादधाति॥ समेवैनं यच्छति॥
आहुतीनां धृत्यै॥ अथो अग्निहोत्रमेवेध्मवत्करोति॥ आहुतीनां प्रतिष्ठि
त्यै॥ ब्रह्मवादिनो वदंति॥ यदेकाᳪ समिधमाधाय द्वे आहुती जुहोति॥
अथ कस्याᳪ समिधि द्वितीयामाहुतिं जुहोतीति॥ ८॥ यद्द्वे समिधा
वादध्यात्॥ भ्रातृव्यमस्मै जनयेत्॥ एकाᳪ समिधमाधाय॥ यजु
षान्यामाहुतिं जुहोति॥ उभे एव समिद्वती आहुती जुहोति॥ नास्मै
भ्रातृव्यं जनयति॥ आदीप्तायां जुहोति॥ समिद्धमिव हि ब्रह्मवर्चसं॥

ब्रा०द्वि०१
६

अथोयथातिथिंज्योतिष्कृत्वापरिवेवेष्टि॥ तादृगेवतत्॥ चतुरुन्नयति॥
द्विर्जुहोति॥ तस्माद्द्विपाच्चतुष्पादमत्ति॥ अथोद्विपद्येवचतुष्पदः प्रति
ष्ठापयति॥ १॥ भवतिप्रतितिष्ठतिगमयतिप्रत्यक्पशाकडपनिधायो
द्धियंतेतितच्चतारिच॥ २॥ उत्तरावतींवैदेवाआहुतिमजुहवुः॥ अ
वाचीमसुराः॥ ततोदेवाअभवन्॥ परासुराः॥ यंकामयेतवसीयान्स्या
दिति॥ कनीयस्तस्यपूर्वं हुत्वा॥ उत्तरंभूयोजुहुयात्॥ एषावाउत्त
रावत्याहुतिः॥ तांदेवाअजुहवुः॥ ततस्तेभवन्॥ १॥ यस्यैवंजुह्वति॥
भवत्येव॥ यंकामयेतपापीयान्स्यादिति॥ भूयस्तस्यपूर्वं हुत्वा॥
उत्तरंकनीयोजुहुयात्॥ एषावाअवाच्याहुतिः॥ तामसुराअजुह॥

सांबू
६

वुः॥ ततस्तेपराभवन्॥ यस्यैवंजुह्वति॥ परैवभवति॥ २॥ हुत्वोपसा
दयत्यजामिताय॥ अथोव्यावृत्त्यै॥ गार्हपत्यंप्रतीक्षते॥ अननुध्यायि
नमेवैनंकरोति॥ अग्निहोत्रस्यवैस्थाणुरस्ति॥ तंयऋच्छेत्॥ यज्ञ
स्थाणुमृच्छेत्॥ एषवाअग्निहोत्रस्यस्थाणुः॥ यत्पूर्वाहुतिः॥ तांयदु
त्तरयाभिजुहुयात्॥ ३॥ यज्ञस्थाणुमृच्छेत्॥ अतिहायपूर्वामाहु
तिंजुहोति॥ यज्ञस्थाणुमेवपरिवृणक्ति॥ अथोभ्रातृव्यमेवात्याति
क्रामति॥ अवाचीनं सायमुपमार्ष्टि॥ रेतएवतद्दधाति॥ ऊर्ध्वंप्रातः॥
प्रजनयत्येवतत्॥ ब्रह्मवादिनोवदंति॥ चतुरुन्नयति॥ ४॥ द्वि
र्जुहोति॥ अथक्वैतेआहुतीभवतइति॥ अग्नौवैश्वानरइतिब्रूयात्॥

एषवाअग्निर्वैश्वानरः॥ यद्ब्राह्मणः॥ हुत्वाद्विःप्राश्नाति॥ अग्नावेववैश्वा
नरेद्वेआहुतीजुहोति॥ द्विर्जुहोति॥ द्विर्निमार्ष्टि॥ द्विःप्राश्नाति॥ ५॥ ष
ट्संपद्यंते॥ षड्वाऋतवः॥ ऋतूनेवप्रीणाति॥ ब्रह्मवादिनोवदंति॥ किं
देवत्यमग्निहोत्रमिति॥ वैश्वदेवमितिब्रूयात्॥ यद्यजुषाजुहोति॥
तदैंद्राग्नं॥ यत्तूष्णीं॥ तत्प्राजापत्यं॥ ६॥ यन्निमार्ष्टि॥ तदोषधीनां॥
यद्द्वितीयं॥ तत्पितृणां॥ यत्प्राश्नाति॥ तद्गर्भाणां॥ तस्माद्गर्भाअनश्नं
तोवर्धंते॥ यदाचामति॥ तन्मनुष्याणां॥ उदङ्पर्यावृत्याचामति॥ ७॥
आत्मनोगोपीथाय॥ निर्णेनेक्तिशुध्यै॥ निष्टपतिस्वगाकृत्यै॥ उ
द्दिशति॥ सप्तर्षीनेवप्रीणाति॥ दक्षिणापर्यावर्तते॥ स्वमेववीर्यम

नुपर्यावर्तते॥ तस्माद्दक्षिणोर्धआत्मनोवीर्यावत्तरः॥ अथोआदित्यस्यै
वावृतमनुपर्यावर्तते॥ हुत्वोपसमिंधे॥ ८॥ ब्रह्मवर्चसस्यसमिध्यै॥
नबर्हिरनुप्रहरेत्॥ असंस्थितोवाएषयज्ञः॥ यदग्निहोत्रं॥ यदनु
प्रहरेत्॥ यज्ञंविच्छिंद्यात्॥ तस्मान्नानुप्रहृत्यं॥ यज्ञस्यसंतत्यै॥ अपो
निनयति॥ अवभृथस्यैवरूपमकः॥ ९॥ अभवन्भवतिजुहुयान्नय
तिमार्ष्टिद्विःप्राश्नातिप्राजापत्यमाचामतीधेकः॥ ४॥ ब्रह्मवादिनोव
दंति॥ अग्निहोत्रप्रायणायज्ञाः॥ किंप्रायणमग्निहोत्रमिति॥ वत्सो
वाअग्निहोत्रस्यप्रायणं॥ अग्निहोत्रंयज्ञानां॥ तस्यपृथिवीसदः॥
अंतरिक्षमाग्नीध्रं॥ द्यौर्हविर्धानं॥ दिव्याआपःप्रोक्षणयः॥ ओषधयो

ब्रा०द्वि०
८

बर्हिः॥ २॥ वनस्पतयइध्मः॥ दिशः परिधयः॥ आदित्यो यूपः॥ यजमा
नः पशुः॥ समुद्रो वभृथः॥ संवत्सरः स्वगाकारः॥ तस्मादाहिताग्नेः स
र्वमेव बार्हिष्यं दत्तं भवति॥ यत्सायंजुहोति॥ रात्रिमेव तेन दक्षिण्यां
कुरुते॥ यत्प्रातः॥ २॥ अहरेव तेन दक्षिण्यं कुरुते॥ यत्ततो ददाति॥
सा दक्षिणा॥ यावंतो वै देवा अहुतमादन्॥ ते पराभवन्॥ त एतद
ग्निहोत्रं सर्वस्यैव समवदाया जुहवुः॥ तस्मादाहुः॥ अग्निहोत्रं
वै देवा गृहाणां निष्कृतिमपश्यन्निति॥ यत्सायं जुहोति॥ रात्रिया
एव तद्धुताद्याय॥ ३॥ यजमानस्यापराभावाय॥ यत्प्रातः॥ अ
ह्न एव तद्धुताद्याय॥ यजमानस्यापराभावाय॥ यत्ततोश्नाति॥

सांव
८

हुतमेव तत॥ द्वयोः पयसा जुहुयात्पशुकामस्य॥ एतद्वा अग्निहोत्रं
मिथुनं॥ य एवं वेद॥ प्रप्रजया पशुभिर्मिथुनैर्जायते॥ ४॥ इमामेव
पूर्वया दुहे॥ अमूमुत्तरया॥ अधिश्रित्योत्तरमानयति॥ यो नावेवतद्रे
तः सिंचत्तिप्रजनने॥ आज्येन जुहुयात्तेजस्कामस्य॥ तेजो वा आज्यं॥ ते
जस्व्येव भवति॥ पयसा पशुकामस्य॥ एतद्वै पशूनां रूपं॥ रूपेणैवा
स्मै पशूनवरुंधे॥ ५॥ पशुमानेव भवति॥ दध्नेंद्रियकामस्य॥ इंद्रियं वै
दधि॥ इंद्रियाव्येव भवति॥ यवाग्वा ग्रामकामस्य॥ ओषधयो वै मनुष्याः॥ भा
गधेयेनैवास्मै सजातानवरुंधे॥ ग्राम्येव भवति॥ अयज्ञो वा एषः॥ यो
सामा॥ ६॥ चतुरुन्नयति॥ चतुरक्षरं रथंतरं॥ रथंतरस्यैष वर्णः॥

ब्रा०द्वि०१
९

उपरीवहरति॥ अंतरिक्षंवा मदेव्यं॥ वामदेव्यस्यैषवर्णः॥ द्विर्जुहोति॥ त्र्य
क्षरंबृहत॥ बृहतएषवर्णः॥ अग्निहोत्रमेवतत्साममन्वत्करोति॥ ७॥ यो
वाअग्निहोत्रस्योपसदोवेद॥ उपैनमुपसदोनमंति॥ विंदतउपसत्तारं॥
उन्नीयोपसादयति॥ पृथिवीमेवप्रीणाति॥ होष्यन्नुपसादयति॥ अंत
रिक्षमेवप्रीणाति॥ हुत्वोपसादयति॥ दिवमेवप्रीणाति॥ एतावाअग्नि
होत्रस्योपसदः॥ ८॥ यएवंवेद॥ उपैनमुपसदोनमंति॥ विंदतउप
सत्तारं॥ योवाअग्निहोत्रस्याश्रावितंप्रत्याश्रावितं होतारंब्रह्माणं
वषट्कारंवेद॥ तस्यत्वेवहुतं॥ प्राणोवाअग्निहोत्रस्याश्रावितं॥
अपानःप्रत्याश्रावितं॥ मनोहोता॥ चक्षुर्ब्रह्मा॥ निमेषोवषट्कारः॥ ९॥

सांब्र
६

यएवंवेद॥ तस्यत्वेवहुतं॥ सायंयावानश्चवैदेवाःप्रातर्यावाणश्चाग्निहो
त्रिणोगृहमागच्छंति॥ तान्यन्नतर्पयेत्॥ प्रजयास्यपशुभिर्वितिष्ठेरन्॥
यत्तर्पयेत्॥ तृप्ताएनंप्रजयापशुभिस्तर्पयेयुः॥ सजूर्देवैःसायंयावभि
रितिसायंसंमृशति॥ सजूर्देवैःप्रातर्यावभिरितिप्रातः॥ येचैवदेवाःसा
यंयावानोयेचप्रातर्यावाणः॥ १०॥ तानेवोभयांस्तर्पयति॥ तएनंतृप्ताः
प्रजयापशुभिस्तर्पयंति॥ अरुणोहस्माहौपवेशिः॥ अग्निहोत्रएवाहं
सायंप्रातर्वज्रंभ्रातृव्येभ्यःप्रहरामि॥ तस्मान्मत्पापीयांसोभ्रातृव्या
इति॥ चतुरुन्नयति॥ द्विर्जुहोति॥ समित्सप्तमी॥ सप्तपदाशक्वरी॥ शा
क्वरोवज्रः॥ अग्निहोत्रएवतत्सायंप्रातर्वज्रंयजमानोभ्रातृव्यायप्रहर

ति॥ भवत्यात्मना॥ परास्य भ्रातृव्यो भवति॥ १३॥ बर्हिः प्रातर्हुताद्वायजायंते
रुंधे सामाकेरास्थेता वा अग्निहोत्रस्योपसदो वषट्कारश्च प्रातर्यावाणोव
त्रस्त्रीणि च॥ ५॥ प्रजापतिरकामयतात्मवन्मे जायेतेति॥ सोजुहोत्॥ त
स्यात्मन्वदजायत॥ अग्निर्वायुरादित्यः॥ तेब्रुवन्॥ प्रजापतिरहोषी दात्म
वन्मे जायेतेति॥ तस्य वयमजनिष्महि॥ जायतां न आत्मन्वदिति ते जुहवुः॥ प्रा
णानामग्निः॥ तनुर्वै वायुः॥ १॥ चक्षुष आदित्यः॥ तेषां हुतादजायत
गौरेव॥ तस्यै पयसि व्यायछंत॥ मम हुतादजनि ममेति॥ ते प्रजापतिं
प्रश्नमायन्॥ स आदित्योग्निमब्रवीत्॥ यतरो नो जयात्॥ तन्नौ सहा
सदिति॥ कस्यै को होषीदिति प्रजापतिरब्रवील्कस्यै कुरुत इति॥ प्राणानाम

हमित्यग्निः॥ २॥ तनुर्वा अहमिति वायुः॥ चक्षुषोहमित्यादित्यः॥ य एव प्रा
णानामहौषीत्॥ तस्य हुतादजनीति॥ अग्नेर्हुतादजनीति॥ तदग्निहो
त्रस्याग्निहोत्रत्वं॥ गौर्वा अग्निहोत्रं॥ य एवं वेद गोरग्निहोत्रमिति॥ प्राणा
पानाभ्यामेवाग्निं समर्धयति॥ अव्यर्धुकः प्राणापानाभ्यां भवति॥ ३॥
य एवं वेद॥ तौ वायुरब्रवीत्॥ अनु मा भजतमिति॥ यदेव गार्हपत्येधिश्रि
त्याहवनीयमभ्युद्द्रवान्॥ तेन त्वां प्रीणानित्यब्रूतां॥ तस्माद्यद्गार्हपत्येधि
श्रित्याहवनीयमभ्युद्द्रवति॥ वायुमेव तेन प्रीणाति॥ प्रजापतिर्देवताः सृ
जमानः॥ अग्निमेव देवतानां प्रथममसृजत॥ सोन्यदालंभ्यमवित्त्वा॥ ४॥
प्रजापतिमभिपर्यावर्तत॥ स मृत्योरबिभेत्॥ सोमुमादित्यमात्मनो निरमि

मीत्॥ तꣳ हुत्वापराङ्पर्यावर्तत॥ ततो वै स मृत्युमपाजयत्॥ अप मृत्युं
जयति॥ य एवं वेद॥ तस्माद्यस्यैवं विदुषः॥ उत्तेका द्रुमुत इह नु जुह्वति॥
हुतमेवास्य भवति॥ असौ ह्यादित्योग्निहोत्रं॥ ५ ॥ तनुं वै वायुरग्निर्भवत्यवि
त्वा भवत्येकं च॥ ६ ॥ रौद्रं गवि॥ वायव्यमुपसृष्टं॥ आश्विनं दुह्यमानं॥ सौ
म्यं दुग्धं॥ वारुणमधिश्रितं॥ वैश्वदेवा बिंदवः॥ पौष्णमुदंतं॥ सारस्वतं वि
ष्यंदमानं॥ मैत्रꣳ शरः॥ धातुरुद्वासितं॥ बृहस्पतेरुन्नीतं॥ सवितुः प्रक्रांतं॥
द्यावापृथिव्यꣳ ह्रियमाणं॥ ऐंद्राग्नमुपसन्नं॥ अग्नेः पूर्वाहुतिः॥ प्रजा
पतेरुत्तरा॥ ऐंद्रꣳ हुतं॥ १ ॥ उद्वासितꣳ सप्त च॥ ७ ॥ दक्षिणत उपसृज
ति॥ पितृलोकमेव तेन जयति॥ प्राचीमावर्तयति॥ देवलोकमेव तेन जयति॥

लोक

उदीचीमावृत्य दोग्धि॥ मनुष्यलोकमेव तेन जयति॥ पूर्वो दुह्याज्ज्येष्ठस्य ज्येष्ठिनेय
स्य॥ यो वा गतश्रीः स्यात्॥ अपरो दुह्यात्कनिष्ठस्य कानिष्ठिनेयस्य॥ यो वा बु
भूषेत्॥ २ ॥ न संमृशति॥ पापवस्यसस्य व्यावृत्त्यै॥ वायव्यं वा एतदुपसृष्टं॥
आश्विनं दुह्यमानं॥ मैत्रं दुग्धं॥ अर्यम्ण उद्वास्यमानं॥ त्वाष्ट्रमुन्नीयमानं॥
बृहस्पतेरुन्नीतं॥ सवितुः प्रक्रांतं॥ द्यावापृथिव्यꣳ ह्रियमाणं॥ २ ॥ ऐं
द्राग्नमुपसादितं॥ सर्वाभ्यो वा एष देवताभ्यो जुहोति॥ योग्निहोत्रं जुहो
ति॥ यथा खलु वै धेनुं तीर्थे तर्पयति॥ एवमग्निहोत्री यजमानं तर्पयति॥
तृप्यति प्रजया पशुभिः॥ प्र सुवर्गं लोकं जानाति॥ पश्यति पुत्रं॥ पश्यति पौ
त्रं॥ प्र प्रजया पशुभिर्मिथुनैर्जायते॥ यस्यैवं विदुषोग्निहोत्रं जुह्वति॥ य

उंचैन देवं वेद ॥ ३ ॥ बृभूंषिद्भ्रियमाणं जायते हैच ॥ ८ ॥ त्रयो वै प्रैयमे
धा आसन् ॥ तेषांत्रिरेकोऽग्निहोत्रमजुहोत् ॥ द्विरेकः ॥ सकृदेकः ॥ त पांय
स्त्रिरजुहोत् ॥ स ऋचाजुहोत् ॥ यो द्विः ॥ स यजुषा ॥ यः सकृत् ॥ स तूष्णीं ॥
॥ १ ॥ यश्च यजुषा जुहोद्यश्च तूष्णीं ॥ तावुभावार्ध्नुतां ॥ तस्माद्यजुषाहु
तिः पूर्वा होतव्या ॥ तूष्णीमुत्तरा ॥ उभे एव धरे अवरुंधे ॥ अग्निर्ज्योतिर्ज्यो
तिरग्निः स्वाहेति सायं जुहोति ॥ रेत एव तद्दधाति ॥ सूर्यो ज्योतिर्ज्योतिः सू
र्यः स्वाहेति प्रातः ॥ रेत एव हितं प्रजनयति ॥ रेतो वा एतस्याहितं न प्रजाय
ते ॥ २ ॥ यस्याग्निहोत्रमहुतं सूर्यो भ्युदेति ॥ यद्यंते स्यात् ॥ उन्नीय प्रा
ङुदाद्रवेत् ॥ स उपसाद्यातमितोरासीत ॥ स यदा ताम्येत् ॥ अथ भूः स्वा

हेति जुहुयात् ॥ प्रजापतिर्वै भूतः ॥ तमेवोपासरत् ॥ स एवैनं ततउन्नयति ॥
नार्तिमार्छति यजमानः ॥ ३ ॥ तूष्णीं जायते यजमानः ॥ ९ ॥ यदग्नि
मुद्धरति ॥ वसवस्तर्ह्यग्निः ॥ तस्मिन्यस्य तथाविधे जुह्वति ॥ वसुष्वेवा
स्याग्निहोत्रं हुतं भवति ॥ निहितो धूपायं स्ते ॥ रुद्रास्तर्ह्यग्निः ॥ तस्मि
न्यस्य तथाविधे जुह्वति ॥ रुद्रेष्वेवास्याग्निहोत्रं हुतं भवति ॥ प्रथमम
भिधमर्चिर्लैरो भते ॥ आदित्यास्तर्ह्यग्निः ॥ ९ ॥ तस्मिन्यस्य तथावि
धे जुह्वति ॥ आदित्येष्वेवास्याग्निहोत्रं हुतं भवति ॥ सर्व एव सर्वशः
इध्म आदीप्तो भवति ॥ विश्वेदेवास्तर्ह्यग्निः ॥ तस्मिन्यस्य तथाविधे जु

हुति॥ विश्वेष्वेवास्य देवेष्वग्निहोत्रं हुतं भवति॥ नितरामर्चिरुपावै
ति लोहिनीकेव भवति॥ इंद्रस्तर्ह्यग्निः॥ तस्मिन्यस्य तथाविधे जुह्वति॥
इंद्र एवास्याग्निहोत्रं हुतं भवति॥ २॥ अंगारा भवंति॥ तेभ्योंगारे
भ्योर्चिरुदेति॥ प्रजापतिस्तर्ह्यग्निः॥ तस्मिन्यस्य तथाविधे जुह्वति॥
प्रजापतावेवास्याग्निहोत्रं हुतं भवति॥ शरोंगारा अध्यूहंते॥ ब्र
ह्म तर्ह्यग्निः॥ तस्मिन्यस्य तथाविधे जुह्वति॥ ब्रह्मन्नेवास्याग्निहो
त्रं हुतं भवति॥ ४ वसुषु रुद्रेष्वादित्येषु विश्वेषु देवेषु॥ इंद्रे प्रजा
पतौ ब्रह्मन्॥ अपरिवर्गमेवास्यैतासु देवतासु हुतं भवति॥

यस्यैवं विदुषोग्निहोत्रं जुह्वति॥ य उ चैनदेवं वेद॥ ३॥ आदित्यास्तर्ह्यग्नि
रिंद्र एवास्याग्निहोत्रं हुतं भवति देवेषु चत्वारि च॥ १०॥ ऋतं त्वा सत्येन
परिषिंचामीति सायं परिषिंचति॥ सत्यं त्वर्तेन परिषिंचामीति प्रातः॥ अग्नि
र्वा ऋतं॥ असावादित्यः सत्यं॥ अग्निमेव तदादित्येन सायं परिषिंचति॥
अग्निनादित्यं प्रातः सः॥ यावदहोरात्रे भवतः॥ तावदस्य लोकस्य॥ नार्ति
र्न रिष्टिः॥ नांतो न पर्यंतोस्ति॥ यस्यैवं विदुषोग्निहोत्रं जुह्वति॥ य उ चैन
देवं वेद॥ ४॥ अस्तिद्वेच॥ ११॥ ॥ अंगिरसः प्रजापतिरग्निं रुद्रउत्त
रावतीं ब्रह्मवादिनोग्निहोत्रप्रायणायज्ञाः प्रजापतिरकामयतात्मन्व
द्रोइंगावेदक्षिणतस्त्रयो वै यदग्निमृतंत्वैकादश॥ ११॥ ॥ अंगि

रसः श्रेवतेनपश्यन्नेवयन्निमार्ष्टियोवाअग्निहोत्रस्यदक्षिणतःषष्टिः ॥ ॥
॥ ६० ॥ ॥ हरिः ओम् ॥ ॥ प्रजापतिरकामयतप्रजाः सृजेयेति ॥
स एतं दशहोतारमपश्यत् ॥ तंमनसानुद्रुत्य दर्भस्तंबेजुहोत् ॥ ततोवै
सप्रजा असृजत ॥ ता अस्मात्सृष्टा अपाक्रामन् ॥ ताग्रहेणागृह्णात् ॥
तद्ग्रहस्यग्रहत्वं ॥ यः कामयेतप्रजायेयेति ॥ सदशहोतारंमनसानुद्रु
त्य दर्भस्तंबेजुहुयात् ॥ प्रजापतिर्वैदशहोता ॥ १ ॥ प्रजापतिरेवभूत्वा
प्रजायते ॥ मनसाजुहोति ॥ मनइवहिप्रजापतिः ॥ प्रजापतेराप्त्यै ॥ पू
र्णयाजुहोति ॥ पूर्णइवहिप्रजापतिः ॥ प्रजापतेराप्त्यै ॥ न्यूनयाजुहो
ति ॥ न्यूनाद्धिप्रजापतिः प्रजा असृजत ॥ प्रजानां सृष्ट्यै ॥ २ ॥ दर्भस्तं

बेजुहोति ॥ एतस्माद्वैयोनेः प्रजापतिः प्रजा असृजत ॥ यस्मादेवयोनेः प्रजाप
तिः प्रजा असृजत ॥ तस्मादेवयोनेः प्रजायते ॥ ब्राह्मणोदक्षिणतउपास्ते ॥
ब्राह्मणोवैप्रजानामुपद्रष्टा ॥ उपद्रष्टुमत्येवप्रजायते ॥ ग्रहीभवति ॥ प्र
जानां सृष्टानांधृत्यै ॥ यंब्राह्मणंविद्यांविद्वांसंयशोनर्छेत् ॥ ३ ॥ सोर
ण्यंपरेत्य ॥ दर्भस्तंबमुद्ग्रथ्य ॥ ब्राह्मणंदक्षिणतोनिषाद्य ॥ चतुर्होतॄन्व्या
चक्षीत ॥ एतद्वैदेवानांपरमंगुह्यंब्रह्म ॥ यच्चतुर्होतारः ॥ तदेवप्रकाशंगम
यति ॥ तदेनंप्रकाशंगतं ॥ प्रकाशंप्रजानांगमयति ॥ दर्भस्तंबमुद्ग्रथ्यव्या
चष्टे ॥ ४ ॥ अग्निवान्वैदर्भस्तंबः ॥ अग्निवत्येवव्याचष्टे ॥ ब्राह्मणोदक्षिण
तउपास्ते ॥ ब्राह्मणोवैप्रजानामुपद्रष्टा ॥ उपद्रष्टुमत्येवैनंयशऋच्छति ॥

ब्रा०द्वि०२
१५

ईश्वरंतंयशोर्तोरित्याहुः॥ यस्यांतेव्याचष्टइति॥ वरस्तस्मैदेयः॥ यदेवैनंत
त्रोपनमति॥ तदेवावरुंधे॥ ५॥ अग्निमादधानो दशहोत्रारणिमवद
ध्यात्॥ प्रजातमेवैनमादधत्ते॥ तेनैवोद्धृत्याग्निहोत्रंजुहुयात्॥ प्रजातमे
वैनज्जुहोति॥ हविर्निर्वप्स्यंदशहोतारंव्याचक्षीत॥ प्रजातमेवैनंनिर्वप
ति॥ सामिधेनीरनुवक्ष्यन्दशहोतारंव्याचक्षीत॥ सामिधेनीरेवसृष्ट्वा
रभ्यप्रतनुते॥ अथोयज्ञोवैदशहोता॥ यज्ञमेवतनुते॥ ६॥ अभिचरं
दशहोतारंजुहुयात्॥ नववैपुरुषेप्राणाः॥ नाभिर्दशमी॥ सप्राणमे
वैनमभिचरति॥ एतावद्वैपुरुषस्यस्वं॥ यावत्प्राणाः॥ यावदेवास्या
स्ति॥ तदभिचरति॥ स्वकृतइरिणेजुहोतिप्रदरेवा॥ एतद्वाअस्यैनि

सांव
१५

निर्ऋतिगृहीतं॥ निर्ऋतिगृहीतएवैनंनिर्ऋत्याग्राहयति॥ यद्वाचःक्रूरं॥ ते
नवषट्करोति॥ वाचएवैनंक्रूरेणप्रवृश्चति॥ ताजगार्तिमार्छति॥ ७॥ द
शहोतासृष्ट्याकृच्छ्राचेष्टरुधरएवतनुतेनिर्ऋतिगृहीतंपंचच॥ १॥
प्रजापतिरकामयतदर्शपूर्णमासौसृजेयेति॥ सएतंचतुर्होतारमपश्यत्॥
तंमनसानुद्रुत्याहवनीयेजुहोत्॥ ततोवैसदर्शपूर्णमासावसृजत॥ ताव
स्मात्सृष्टावपाक्रामतां॥ तौग्रहेणागृह्णात्॥ तद्ग्रहस्यग्रहत्वं॥ दर्शपूर्णमा
सावालभमानः॥ चतुर्होतारंमनसानुद्रुत्याहवनीयेजुहुयात्॥ दर्शपू
र्णमासावेवसृष्ट्वारभ्यप्रतनुते॥ १॥ ग्रहोभवति॥ दर्शपूर्णमासयोःसृ
ष्टयोर्धृत्यै॥ सोकामयतचातुर्मास्यानिसृजेयेति॥ सएतंपंचहोतारमप

बा० द्वि०२
१६

श्यत॥ तंमनसानुद्रुत्याहवनीयेजुहोत्॥ ततोवैसचातुर्मास्यान्यसृजत॥ तान्यस्मात्सृष्टान्यपाक्रामन्॥ तानिग्रहेणागृह्णात्॥ तद्ग्रहस्यग्रहत्वं॥ चातुर्मास्यालभमानः॥ २ ॥ पंचहोतारंमनसानुद्रुत्याहवनीयेजुहुयात्॥ चातुर्मास्यान्येवसृष्ट्वारभ्यप्रतनुते॥ ग्रहोभवति॥ चातुर्मास्यानां सृष्टानांधृत्यै॥ सोकामयतपशुबंधं सृजेयेति॥ सएतं षड्ढोतारमपश्यत्॥ तंमनसानुद्रुत्याहवनीयेजुहोत्॥ ततोवैसपशुबंधमसृजत॥ सोस्मात्सृष्टोपाक्रामत्॥ तंग्रहेणागृह्णात्॥ ३ ॥ तद्ग्रहस्यग्रहत्वं॥ पशुबंधेनयक्ष्यमाणः॥ षड्ढोतारंमनसानुद्रुत्याहवनीयेजुहुयात्॥ पशुबंधमेवसृष्ट्वारभ्यप्रतनुते॥ ग्रहोभवति॥ पशुबंधस्यसृष्टस्यधृत्यै॥ सोकामयतसौम्यमध्वरं

सांव
१६

सृजेयेति॥ सएतं सप्तहोतारमपश्यत्॥ तंमनसानुद्रुत्याहवनीयेजुहोत्॥ ततोवैससौम्यमध्वरमसृजत॥ ४ ॥ सोस्मात्सृष्टोपाक्रामत्॥ तंग्रहेणागृह्णात्॥ तद्ग्रहस्यग्रहत्वं॥ दीक्षिष्यमाणः॥ सप्तहोतारंमनसानुद्रुत्याहवनीयेजुहुयात्॥ सौम्यमेवाध्वरं सृष्ट्वारभ्यप्रतनुते॥ ग्रहोभवति॥ सौम्यस्याध्वरस्यसृष्टस्यधृत्यै॥ देवेभ्योवैयज्ञोनप्राभवत्॥ तमेतावच्छः समभरन्॥ ५ ॥ यत्संभाराः॥ ततोवैतेभ्योयज्ञः प्राभवत्॥ यत्संभाराभवंति॥ यज्ञस्यप्रभूत्यै॥ आतिथ्यमासाद्यान्वाहृ॥ यज्ञमुखंवाआतिथ्यं॥ मुखतएवयज्ञं संभृत्यप्रतनुते॥ अयज्ञोवाएषः॥ योपत्नीकः॥ नप्रजाः प्रजायेरन्॥ पत्नीर्व्याचष्टे॥ यज्ञमेवाकः॥ प्रजानांप्रजननाय॥ उपसत्स्वा

बा॰ द्वि॰
१६७

चेष्टे॥ एतद्वैपत्नीनामायतनं॥ स्वएवैनाआयतनेवकल्पयति॥ ६॥ तनुतत्रा
लभमानोगृह्णादसृजताभरंजायेरन्ष्वद्व॥ २॥ प्रजापतिरकामयतप्रजा
येयेति॥ सतपोतप्यत॥ सत्रिवृतंस्तोममसृजत॥ तंपंचदशस्तोमोमध्यत
उदतृणत्॥ तौपूर्वपक्षश्चापरपक्षश्चाभवतां॥ पूर्वपक्षंदेवाअन्वसृज्यंत॥
अपरपक्षमन्वसुराः॥ ततोदेवाअभवन्॥ परासुराः॥ यंकामयेतवसीया
न्त्स्यादिति॥ १॥ तंपूर्वपक्षेयाजयेत्॥ वसीयानेवभवति॥ यंकामयेतपापी
यान्त्स्यादिति॥ तमपरपक्षेयाजयेत्॥ पापीयानेवभवति॥ तस्मात्पूर्वप
क्षोपरपक्षात्करुण्यतरः॥ प्रजापतिर्वैदशहोता॥ चतुर्होतापंचहोता॥
षड्ढोतासप्तहोता॥ ऋतवःसंवत्सरः॥ २॥ प्रजाःपशवइमेलोकाः॥ यए

सांब
१७

वंप्रजापतिंबहोर्भूयाꣳसंवेद॥ बहोरेवभूयान्भवति॥ प्रजापतिर्देवासुरानसृ
जत॥ सइंद्रमपिनासृजत॥ तंदेवाअब्रुवन्॥ इंद्रंनोजनयेति॥ सोब्रवीत्॥ य
थाहंयुष्मांस्तपसासृक्षि॥ एवमिंद्रंजनयध्वमिति॥ ३॥ तेतपोतप्यंत॥
तआत्मन्निंद्रमपश्यन्॥ तमब्रुवन्॥ जायस्वेति॥ सोब्रवीत्॥ किंभागधेय
मभिजनिष्यइति॥ ऋतून्त्संवत्सरं॥ प्रजाःपशून्॥ इमान्लोकानित्यब्रुवन्॥
तंवैमाहुत्याप्रजनयतेत्यब्रवीत्॥ ४॥ तंचतुर्होत्राजनयन्॥ यःकामयेत
वीरोमआजायेतेति॥ सचतुर्होतारंजुहुयात्॥ प्रजापतिर्वैचतुर्होता॥ प्रजा
पतिरेवभूत्वाप्रजायते॥ जजनदिंद्रमिंद्रियायस्वाहेतिग्रहेणजुहोति॥ आस्य
वीरोजायते॥ वीरꣳहिदेवाएतयाहुत्याप्राजनयन्॥ आदित्याश्चांगिरसश्च

सुवर्गेलोकेस्पर्धंत॥वयंपूर्वेसुवर्गंलोकमियामवयंपूर्वइति॥ ५ ॥तआदि
त्याएतंपंचहोतारमपश्यन्॥तंपुराप्रातरनुवाकादाग्नीध्रेजुहवुः॥ततोवै
तेपूर्वेसुवर्गंलोकमायन्॥यःसुवर्गकामःस्यात्॥सपंचहोतारंपुराप्रातर
नुवाकादाग्नीध्रेजुहुयात्॥संवत्सरोवैपंचहोता॥संवत्सरःसुवर्गोलोकः॥
संवत्सरएवर्तुषुप्रतिष्ठाय॥सुवर्गंलोकमेति॥तेऽब्रुवन्नंगिरसआदित्या
न्॥ ६ ॥कस्थ॥कवःसद्भ्योहव्यंवक्ष्यामइति॥छंदःस्वित्यब्रुवन्॥गाय
त्रियांत्रिष्टुभिजगत्यामिति॥तस्माच्छंदःसुसद्भ्यआदित्येभ्यः॥आंगिरसीः
प्रजाहव्यंवहंति॥वहंत्यस्मैप्रजाबलिं॥ऐनमप्रतिख्यातंगच्छति॥यए
वंवेद॥द्वादशमासाःपंचर्तवः॥त्रयइमेलोकाः॥असावादित्यएकविंशः॥

एतस्मिन्वाएषश्रितः॥एतस्मिन्प्रतिष्ठितः॥यएवमेतंश्रितंप्रतिष्ठितंवेद॥प्र
त्येवतिष्ठति॥ ७ ॥स्यादितिसंवत्सरोजनयध्वमितीत्यब्रवीत्पूर्वइत्यादित्या
नृतवःषड्च॥ ३ ॥प्रजापतिरकामयतप्रजायेयेति॥सएतंदशहोतारम
पश्यत्॥तेनदशधात्मानंविधाय॥दशहोत्रातप्यत॥तस्यचित्तिःस्रुगासीत्॥
चित्तमाज्यं॥तस्यैतावत्येववागासीत्॥एतावान्यज्ञक्रतुः॥सचतुर्होतारम
सृजत॥सोऽनंदत्॥ १ ॥असृक्षिवाइममिति॥तस्यसोमोहविरासीत्॥स
चतुर्होत्रातप्यत॥सोऽताम्यत्॥सभूरितिव्याहरत्॥सभूमिमसृजत॥अग्नि
होत्रंदर्शपूर्णमासौयजूंषि॥सद्वितीयमतप्यत॥सोऽताम्यत्॥सभुवइति
व्याहरत्॥ २ ॥सोंतरिक्षमसृजत॥चातुर्मास्यानिसामानि॥सतृतीयमत

आ०द्वि०२
१६

प्यत॥ सोतास्यत्॥ सस्रुवरितिव्याहरत्॥ सद्दिवमसृजत॥ अग्निष्टोममुक्थ्य
मतिरात्रमृचः॥ एतावैव्याहृतयइमेलोकाः॥ इमान्खलुवैलोकाननुप्रजाः
पशवश्छंदांःसिप्राजायंत॥ यएवमेताःप्रजापतेःप्रथमाव्याहृतीःप्रजाता
वेद॥ ३॥ प्रप्रजयापशुभिर्मिथुनैर्जायते॥ सपंचहोतारमसृजत॥ सहवि
र्नाविंदत॥ तस्मैसोमस्तनुवंप्रायच्छत्॥ एतत्तेहविरिति॥ सपंचात्रात्यत॥ हो
सोतास्यत॥ सप्रत्यङ्बाधत॥ सोसुरानसृजत॥ तदस्याप्रियमासीत्॥ ४॥
तद्दुर्वर्णंहिरण्यमभवत्॥ तद्दुर्वर्णस्यहिरण्यस्यजन्म॥ सद्वितीयमतप
त॥ सोतास्यत्॥ सप्राङबाधत॥ सदेवानसृजत॥ तदस्यप्रियमासीत्॥
तत्सुवर्णंहिरण्यमभवत्॥ तत्सुवर्णस्यहिरण्यस्यजन्म॥ यएवंसुव

सां०ब्रा०
१९

र्णस्यहिरण्यस्यजन्मवेद॥ ५॥ सुवर्णआत्मना भवति॥ दुर्वर्णोस्यभ्रात
व्यः॥ तस्मात्सुवर्णंहिरण्यंभार्यं॥ सुवर्णएवभवति॥ एनंप्रियंगच्छतिनाप्रि
यं॥ ससप्तहोतारमसृजत॥ ससप्तहोत्रैवसुवर्गंलोकमैत्॥ त्रिणवेनस्तो
मेनैभ्योलोकेभ्योसुरान्प्राणुदत॥ त्रयस्त्रिंशेनप्रत्यतिष्ठत्॥ एकविंशे
नरुचमधत्त॥ सप्तदशेनप्राजायत॥ यएवंविद्वान्त्सोमेनयजते॥
सप्तहोत्रैवसुवर्गंलोकमेति॥ त्रिणवेनस्तोमेनैभ्योलोकेभ्योभ्रातृव्या
न्प्रणुदते॥ त्रयस्त्रिंशेनप्रतितिष्ठति॥ एकविंशेनरुचंधत्ते॥ सप्तद
शेनप्रजायते॥ तस्मात्सप्तदशस्तोमोननिर्हृत्यः॥ प्रजापतिर्वैसप्तदशः॥
प्रजापतिमेवमध्यतोधत्तेप्रजात्यै॥ अनंदत्सुवइतिव्याहरद्देदासी

ब्रा॰ द्वि॰
२०

ह्वेदाधत्तप्रजात्यै॥ ४ ॥ देवावैवरुणमयाजयन्॥ सयस्यैयस्यैदेवतायैदक्षि
णामनयत्॥ तामव्लीनात्॥ तेऽब्रुवन्॥ व्यावृत्यप्रतिगृह्णाम॥ तथानोदक्षि
णानव्लेष्यतीति॥ तेव्यावृत्यप्रत्यगृह्णन्॥ ततोवैतांदक्षिणानाव्लीनात्॥ य
एवंविद्वान्व्यावृत्यदक्षिणांप्रतिगृह्णाति॥ नैनंदक्षिणाव्लीनाति॥ २॥
राजात्वावरुणोनयतुदेविदक्षिणेऽग्नयेहिरण्यमित्याह॥ आग्नेयंवैहिर
ण्यं॥ स्वयैवैनद्देवतयाप्रतिगृह्णाति॥ सोमायवासइत्याह॥ सौम्यंवैवा
सः॥ स्वयैवैनद्देवतयाप्रतिगृह्णाति॥ रुद्रायगामित्याह॥ रौद्रीवैगौः॥
स्वयैवैनांदेवतयाप्रतिगृह्णाति॥ वरुणायाश्वमित्याह॥ २॥ वारुणो
वाअश्वः॥ स्वयैवैनंदेवतयाप्रतिगृह्णाति॥ प्रजापतयेपुरुषमित्याह॥

सांबु
२०

प्राजापत्योवैपुरुषः॥ स्वयैवैनंदेवतयाप्रतिगृह्णाति॥ मनवेतल्पमित्या
ह॥ मानवोवैतल्पः॥ स्वयैवैनंदेवतयाप्रतिगृह्णाति॥ उत्तानायांगीरसाया
नइत्याह॥ इयंवाउत्तानआंगीरसः॥ ३॥ अनयैवैनत्प्रतिगृह्णाति॥ वैश्वा
नर्यर्चारथंप्रतिगृह्णाति॥ वैश्वानरोवैदेवतयारथः॥ स्वयैवैनंदेवतयाप्रति
गृह्णाति॥ तेनामृतत्वमश्यामित्याह॥ अमृतमेवात्मन्धत्ते॥ वयोदात्रइत्या
ह॥ वयएवैनत्कृत्वा॥ सुवर्गंलोकंगमयति॥ मयोमह्यमस्तुप्रतिग्रहीत्रइ
त्याह॥ ४॥ यद्वैशिवं॥ तन्मयः॥ आत्मनएवैषापरीत्तिः॥ कइदंकस्माअ
दादित्याह॥ प्रजापतिर्वैकः॥ सप्रजापतयेददाति॥ कामःकामायेत्याह॥ का
मेनाहिददाति॥ कामेनप्रतिगृह्णाति॥ कोदाताकामःप्रतिग्रहीतेत्याह॥ ५॥

मै।

ब्रा०द्वि०२
२२

कामोहिदाता॥ कामंः प्रतिग्रहीता॥ कामंः समुद्रमाविशेत्याह॥ समुद्रइवहि
कामंः॥ नेवहिकामस्यांतोऽस्ति॥ नसमुद्रस्य॥ कामेनत्वाप्रतिगृह्णामीत्याह॥
येनुकामेनप्रतिगृह्णाति॥ सएवैनममुष्मिंल्लोकेकामआगच्छति॥ कामैत
त्तएषातेकामदक्षिणेत्याह॥ कामएवतद्यजमानोमुष्मिंल्लोकेदक्षिणामि
च्छति॥ नप्रतिग्रहीतरि॥ यएवंविद्वान्दक्षिणांप्रतिगृह्णाति॥ अनृणामेवै
नांप्रतिगृह्णाति॥ ६ ॥ब्रीनात्वश्वमित्याहांगीरसः प्रतिग्रहीत्रइत्याहप्र
तिग्रहीतेत्याहदक्षिणेत्याहचत्वारिच॥ ५ ॥ अंतोवाएषयज्ञस्य॥ यद्दश
ममहः॥ दशमेहन्त्सर्पराज्ञियाऋग्भिस्तुवंति॥ यज्ञस्यैवांतंगत्वा॥ अन्ना
द्यमवरुंधते॥ तिसृभिस्तुवंति॥ त्रयइमेलोकाः॥ एभ्यएवलोकेभ्योन्नाद्य

मान्
२२

मवरुंधते॥ पृश्निवतीर्भवंति॥ अन्नंवैपृश्नि॥ अन्नमेवावरुंधते॥ मनसाप्रस्तौ
ति॥ मनसोद्गायति॥ मनसाप्रतिहरति॥ मनइवहिप्रजापतिः॥ प्रजापतेरा
प्त्यै॥ देवावैसर्पाः॥ तेषामियंराज्ञी॥ यत्सर्पराज्ञियाऋग्भिस्तुवंति॥ अस्या
मेवप्रतितिष्ठंति॥ २ ॥ चतुर्होतॄन्होताव्याचष्टे॥ स्तुतमनुशंसतिशांत्यै॥
अंतोवाएषयज्ञस्य॥ यद्दशममहः॥ एतत्खलुवैदेवानांपरमंगुह्यंब्रह्म॥
यच्चतुर्होतारः॥ दशमेहंश्चतुर्होतॄन्व्याचष्टे॥ यज्ञस्यैवांतंगत्वा॥ परमं
देवानांगुह्यंब्रह्मावरुंधे॥ तदेवप्रकाशंगमयति॥ ३ ॥ तदेनंप्रकाशंगतं॥
प्रकाशंप्रजानांगमयति॥ वाचंयच्छति॥ यज्ञस्यधृत्यै॥ यजमानदेवत्यं
वाअहः॥ भ्रातृव्यदेवत्याराात्रिः॥ अह्नारात्रिंध्यायेत्॥ भ्रातृव्यस्यैवत

ब्रा०द्वि०२
२२

ल्लोकंवृंक्ते॥ यद्दिवावाचंविसृजेत॥अहर्भ्रातृव्यायोच्छिंषेत॥यन्नक्तंविस
जेत॥रात्रिंभ्रातृव्यायोच्छिंषेत॥अधिवृक्षसूर्येवाचंविसृजति॥एतावंतमे
वास्मैलोकमुच्छिंषति॥यावदादित्योस्तमेति॥ ५ ॥एष्विनितिषंगमयति ति
शिंषेत्यंवच॥ ६ ॥प्रजापतिःप्रजाअसृजत॥ताःसृष्टाःसमश्लिष्यन॥
तारूपेणानुप्राविशत॥तस्मादाहुः॥रूपंवैप्रजापतिरिति॥तानाम्नानुप्रा
विशत॥तस्मादाहुः॥नामवैप्रजापतिरिति॥तस्मादप्यामित्रौसंगत्य॥
नाम्नाव्हयेते॥ १ ॥मित्रमेवभवतः॥प्रजापतिर्देवासुरानसृजत॥स
इंद्रमपिनासृजत॥तंदेवाअब्रुवन॥इंद्रन्नोजनयेति॥सआत्मन्निंद्रमप
श्यत॥तमसृजत॥तंत्रिष्टुग्वीर्यंभूत्वानुप्राविशत॥तस्यवज्रःपंचदशोह

समंबु
२

स्तआपद्यत॥तेनोदग्यासुरानभ्यभवत॥ २ ॥यएवंवेद॥अभिभ्रातृव्यान्भव
ति॥तेदेवाअसुरैर्विजित्य॥सुवर्गंलोकमायन॥तेमुष्मिन्लोकेव्यक्षुध्यन॥
तेब्रुवन॥अमुतःप्रदानंवाउपजिजीविमेति॥तेसप्तहोतारंयज्ञंविधायाया
स्यं॥आंगीरसंप्राहिण्वन॥एतेनामुत्रकल्पयेति॥ ३ ॥तस्यवावेयंक्लृप्तिः॥
यदिदंकिंच॥यएवंवेद॥कल्पतेस्मै॥सवाअयंमनुष्येषुयज्ञःसप्तहोता॥अ
मुत्रसद्भ्योदेवेभ्योहव्यंवहति॥यएवंवेद॥उपैनंयज्ञोनमति॥सोमन्यत॥
अभिवाइमेस्माल्लोकादमुंलोकंकमिष्यंतइति॥सवाचस्पतेहृदितिव्याह
रत॥तस्मात्पुत्रोहृदयं॥तस्मादस्माल्लोकादमुंलोकंनाभिकामयंते॥पुत्रो
हिहृदयं॥ ४ ॥क्लृप्तेभवत्कल्पयेतीतिचत्वारिच॥ ७ ॥देवावैचतु

ब्रा० द्वि० २
२३

दे

होतृभिर्यज्ञमतन्वत ॥ तेपाप्मनाभ्रातृव्येणाजयंत ॥ अभिसुवर्गं लोकमजयन् ॥
यएवंविद्वांश्चतुर्होतृभिर्यज्ञं तनुते ॥ विपाप्मना भ्रातृव्येण जयते ॥ अभिसु
वर्गंलोकंजयति ॥ षड्ढोत्रा प्रायणीयमासादयति ॥ अमुष्मैवैलोकाय षड्ढो
ता ॥ घ्नंति खलु वाएतत्सोमं ॥ यदभिषुण्वंति ॥ १ ॥ ऋजुधैवैनममुं लोकंग
मयति ॥ चतुर्होत्रा तिथ्यं ॥ यत्रोवैचतुर्होता ॥ यशएवात्मन्धत्ते ॥ पंचहो
त्रा पशुमुपसादयति ॥ सुवर्ग्योवै पंचहोता ॥ यजमानः पशुः ॥ यजमानमे
व सुवर्गंलोकं गमयति ॥ यहान्गृही त्वा सप्तहोतारंजुहोति ॥ इंद्रियंवैस
प्तहोता ॥ २ ॥ इंद्रियमेवात्मन्धत्ते ॥ योवैचतुर्होतृननुसवनंतर्पयति ॥ त
प्यति प्रजया पशुभिः ॥ उपैनं सोमपीथोनमति ॥ बहिष्पवमाने दशहोता

सांब्र
२३

रंब्या चक्षीत ॥ माध्यंदिनेपवमाने चतुर्होतारं ॥ आर्भवेपवमाने पंचहोतारं ॥
पितृयज्ञेषड्ढोतारं ॥ यज्ञायज्ञियस्य स्तोत्रे सप्तहोतारं ॥ अनुसवनमेवैनां
स्तर्पयति ॥ ३ ॥ तृप्यति प्रजया पशुभिः ॥ उपैनं सोमपीथोनमति ॥ देवा
वैचतुर्होतृभिः सत्रमासत ॥ ऋद्धिपरिमितंयशस्कामाः ॥ तेब्रुवन् ॥ यन्नःप्र
थमंयशऋच्छात् ॥ सर्वेषांनस्तत्सहासदिति ॥ सोमश्चतुर्होत्रा ॥ अग्निः
पंचहोत्रा ॥ धाता षड्ढोत्रा ॥ ४ ॥ इंद्रः सप्तहोत्रा ॥ प्रजापतिर्दशहोत्रा ॥
तेषां सोमं राजानं यश आर्च्छत् ॥ तन्न्यकामयत ॥ तेनापाक्रामत् ॥ ते
नप्रलायमचरत् ॥ तंदेवाः प्रैषैः प्रैषमैच्छन् ॥ तत्प्रैषाणांप्रैषत्वं ॥ निवि
द्भिर्न्यवेदयन् ॥ तन्निविदान्निवित्वं ॥ ५ ॥ आप्रीभिराप्नुवन् ॥ तदाप्रीणा

माप्रित्वं ॥ तमघ्नन् ॥ तस्ययशो व्यगृह्णत ॥ तेयहा अभवन् ॥ तद्ग्रहाणां ग्रह
त्वं ॥ यस्यैवंविदुषो ग्रहा गृह्यंते ॥ तस्यत्वेवगृहीताः ॥ तेब्रुवन् ॥ योवैनःश्रेष्ठो
भूत् ॥ ६ ॥ तमवधिष्म ॥ पुनरिमं सुवामहा इति ॥ तंछंदोभिरसुवंत ॥ त
च्छंदसांछंदस्त्वं ॥ साम्नासमानयन् ॥ तत्साम्नः सामत्वं ॥ उक्थैरुदस्था
पयन् ॥ तदुक्थानामुक्थत्वं ॥ यएवंवेद ॥ प्रत्येवतिष्ठति ॥ ७ ॥ सर्वमायुरेति ॥
सोमोवैयशः ॥ यएवंविद्वान्त्सोममागच्छति ॥ यशएवैनमृच्छति ॥ तस्मा
दाहुः ॥ यश्चैवंवेदयश्चन ॥ तावुभौसोममागच्छतः ॥ सोमोहिय शः ॥ तं
त्वावयशऋच्छतीत्याहुः ॥ यःसोमेसोमंप्राहेति ॥ तस्मात्सोमेसोमः प्रोच्यः ॥
यशएवैनमृच्छति ॥ ८ ॥ अभिषुण्वंतिसप्तहोतातर्पयतिषड्ढोत्राणि

विलमभूत्तिष्ठतिग्राहेतिद्वेच ॥ ९ ॥ इदंवाअग्रेनैवकिंचनासीत् ॥ नद्यौरासी
त् ॥ नपृथिवी ॥ नांतरिक्षं ॥ तदसदेवसन्मनोकुरुतस्यामिति ॥ तदतप्यत ॥
तस्मात्तेपानाद्धूमोजायत ॥ तद्भूयोतप्यत ॥ तस्मात्तेपानादग्निरजायत ॥ त
द्भूयोतप्यत ॥ तस्मात्तेपानाज्ज्योतिरजायत ॥ तद्भूयोतप्यत ॥ तस्मात्तेपा
नादर्चिरजायत ॥ तद्भूयोतप्यत ॥ तस्मात्तेपानान्मरीचयोजायंत ॥ तद्भू
योतप्यत ॥ तस्मात्तेपानादुदाराअजायंत ॥ तद्भूयोतप्यत ॥ तदभ्रमिवस
मेहन्यत ॥ २ ॥ तद्वस्तिमभिनत् ॥ ससमुद्रोभवत् ॥ तस्मात्समुद्रस्यनपि
बंति ॥ प्रजननमिवहिमन्यंते ॥ तस्मात्पशोर्जायमानादापःपुरस्ताद्यं
ति ॥ तद्दशहोतान्वसृज्यत ॥ प्रजापतिर्वैदशहोता ॥ यएवंतपसोवीर्यं

ब्रा०द्वि०२
२५

विद्वान्स्तप्यते ॥ भवत्येव ॥ नवाऽइदमापः सलिलमासीत् ॥ सोरोदीत्प्रजापतिः ॥ ॥ ३ ॥ सकस्माअज्ञि ॥ यद्यस्याअप्रतिष्ठाया इति ॥ यदप्स्ववापद्यत ॥ सापृथिव्यभवत् ॥ यद्व्यमृष्ट ॥ तदंतरिक्षमभवत् ॥ यदूर्ध्वमुदमृष्ट ॥ साद्यौरभवत् ॥ यदरोदीत् ॥ तदनयोरोदस्त्वं ॥ ४ ॥ यएवंवेद ॥ नास्यगृहेरुदंति ॥ एतद्वा एषांलोकानांजन्म ॥ यएवमेषांलोकानांजन्मवेद ॥ नेषुलोकेष्वार्तिमार्छति ॥ सइमांप्रतिष्ठामविंदत ॥ सइमांप्रतिष्ठांवित्वाकामयतप्रजायेयेति ॥ सतपोतप्यत ॥ सोंतर्वानभवत् ॥ सजघनादसुरानसृजत ॥ ५ ॥ तेभ्योमृन्मयेपात्रेन्नमदुहत् ॥ यास्यसातनूरासीत् ॥ तामपाहत ॥ सातमिस्राभवत् ॥ सोकामयतप्रजायेयेति ॥ सतपोतप्यत ॥ सोंतर्वानभवत् ॥

सां०ब्रा
२५

व१

सप्रजननादेवप्रजाअसृजत ॥ तस्मादिमाभूयिष्ठाः ॥ प्रजननाद्ध्येनाअसृजत ॥ ६ ॥ ताभ्योदारुमयेपात्रेपयोदुहत् ॥ यास्यसातनूरासीत् ॥ तामपाहत ॥ साज्योत्स्नाभवत् ॥ सोकामयतप्रजायेयेति ॥ सतपोतप्यत ॥ सोंतर्वानभवत् ॥ सउपपक्षाभ्यामेवर्तून्सृजत ॥ तेभ्योरजतेपात्रेघृतमदुहत् ॥ यास्यसातनूरासीत् ॥ ७ ॥ तामपाहत ॥ सोहोरात्रयोःसंधिरभवत् ॥ सोकामतप्रजायेयेति ॥ सतपोतप्यत ॥ सोंतर्वानभवत् ॥ समुखाद्देवानसृजत ॥ तेभ्योहरितेपात्रेसोममदुहत् ॥ यास्यसातनूरासीत् ॥ तामपाहत ॥ तदहरभवत् ॥ ८ ॥ एतेवैप्रजापतेर्दोहाः ॥ यएवंवेद ॥ दुहएवप्रजाः ॥ दिवावैनोभूदिति ॥ तद्देवानांदेवत्वं ॥ यएवंदेवानांदेवत्वंवेद ॥ देववानेवभवति ॥

एतद्वाअहोरात्राणांजन्म॥यएवमहोरात्राणांजन्मवेद॥ नाहोरात्रेषार्तिमा
र्छति॥ ९ ॥असतोधिमनोसृज्यत॥मनःप्रजापतिमसृजत॥प्रजापतिः
प्रजाअसृजत॥तद्वाइदंमनःस्येवपरमंप्रतिष्ठितं॥यदिदंकिंच॥तदे
तच्छ्वोवस्यसंनामब्रह्म॥व्युछंतीव्युछंत्यस्मैवस्यसीवस्यसीव्युछति॥
प्रजायतेप्रजयापशुभिः॥प्रपरमेष्ठिनोमात्रामाप्नोति॥यएवंवेद॥ १०॥
अग्निरजायततद्भयोलप्यताभिनदरोदीत्प्रजापतीरोदस्त्वमसृजता
सृजनघृतमंडुहद्धास्यसातनूरासीद्दहरभवद्दछतिवेद॥ ९ ॥प्रजापति
रिंद्रमसृजतानुवरंदेवानां॥तंप्राहिणात्॥परेहि॥एतेषांदेवानामधि
पतिरेधीति॥तंदेवाअब्रुवन्॥कस्त्वमसि॥वयंवैत्वच्छ्रेयांःसस्मइति॥

सोब्रवीत्॥कस्त्वमसिवयंवैत्वच्छ्रेयांःसस्मइतिमादेवाअवोचन्निति॥अथ
वाइदंतर्हिप्रजापतेर्हरआसीत्॥ १ ॥यदस्मिन्नादित्ये॥तदेनमब्रवीत्॥एत
न्मेप्रयछ॥अथाहमेतेषांदेवानामधिपतिर्भविष्यामीति॥कोहंस्यामित्य
ब्रवीत्॥एतत्प्रदायेति॥एतत्स्याइत्यब्रवीत्॥यदेतद्ब्रवीषीति॥कोहवैनाम
प्रजापतिः॥यएवंवेद॥ २ ॥विदुरेनंनाम्ना॥तदस्मैरुक्मंकृत्वाप्रत्यमुंचत्॥
ततोवाइंद्रोदेवानामधिपतिरभवत्॥यएवंवेद॥अधिपतिरेवसमानानां
भवति॥सोमन्यत॥किंकिंवाअकरमिति॥सचंद्रंमआहरेतिप्रालपत्॥
तच्चंद्रमसश्चंद्रमस्त्वं॥यएवंवेद॥ ३ ॥चंद्रवानेवभवति॥तंदेवाअब्रुवन्॥
सुवीर्योमर्यायथागोपायतइति॥तत्सूर्यस्यसूर्यत्वं॥यएवंवेद॥नैनंद

श्राद्वि॰
२७

भ्नोति॥ कस्थुनास्मिन्वाहृदमिंद्रियंप्रत्यस्थादिति॥ तदिंद्रस्येंद्रत्वं॥ यएवंवेद॥
इंद्रियाव्येव भवति॥ ४॥ अयंवाहृदंपरमो भूदिति॥ तत्परमेष्ठिनः परमेष्ठि
त्वं॥ यएवंवेद॥ परमामेवकाष्ठांगछति॥ तंदेवाः समंतंपर्यविशन्॥ वसवः पुर
स्तात्॥ रुद्रा दक्षिणतः॥ आदित्याः पश्चात्॥ विश्वेदेवाउत्तरतः॥ अंगिरसः
प्रत्यंचं॥ ५॥ साध्याः परांचं॥ यएवंवेद॥ उपैनं समानाः संविशंति॥ सप्रजा
पतिरेव भूत्वा प्रजा आवयत्॥ ताअस्मैनातिष्ठंतान्नाद्याय॥ तामुखंपुरस्ता
त्पश्यंतीः॥ दक्षिणतः पर्यायन्॥ सदक्षिणतः पर्यवर्तयत॥ तामुखंपुरस्ता
त्पश्यंतीः॥ मुखंदक्षिणतः॥ ६॥ पश्चात्पर्यायन्॥ सपश्चात्पर्यवर्तयत॥
तामुखंपुरस्तात्पश्यंतीः॥ मुखंदक्षिणतः॥ मुखंपश्चात्॥ उत्तरतः पर्याय

सांबू
२७

न्॥ सउत्तरतः पर्यवर्तयत॥ तामुखंपुरस्तात्पश्यंतीः॥ मुखंदक्षिणतः॥ मुखंपश्चा
त्॥ ७॥ मुखमुत्तरतः॥ ऊर्ध्वाउदायन्॥ सउपरिष्टान्न्यवर्तयत॥ ताः सर्वतोमुखो
भूत्वावयत्॥ ततोवैतस्मैप्रजा अतिष्ठंतान्नाद्याय॥ यएवंविद्वान्परिच वर्तयते
निच॥ प्रजापतिरेव भूत्वाप्रजा अत्ति॥ तिष्ठंतेस्मैप्रजा अन्नाद्याय॥ अन्नादएव
भवति॥ ८॥ आसीद्वेदं चंद्रमस्त्वं यएवंवेदेंद्रियाव्येव भवति प्रत्यंचं मुखंदक्षिण
तो मुखंपश्चान्नवेच॥ १०॥ प्रजापतिरकामयत बहोर्भूयान्त्स्यामिति॥ सए
तंदशहोतारमपश्यत्॥ तंप्रायुंक्त॥ तस्यप्रयुक्तिबहोर्भूयानभवत्॥ यः का
मयेत बहोर्भूयान्त्स्यामिति॥ सदशहोतारंप्रयुंजीत॥ बहोरेव भूयान्भवति॥
सोकामयतवीरोमआजायेतेति॥ सदशहोतुश्चतुर्होतारंनिरमिमीत॥ तं

ब्रा०द्वि०२
२९

प्रायुङ्क्त ॥ १ ॥ तस्य प्रयुक्तिं वीरो जायत ॥ यः कामयेत वीरो म आजायेतेति ॥ स चतुर्होता
रं प्रयुंजीत ॥ आस्य वीरो जायते ॥ सोऽकामयत पशुमान्त्स्यामिति ॥ स चतुर्होतुः
पंचहोतारं निरमिमीत ॥ तं प्रायुङ्क्त ॥ तस्य प्रयुक्ति पशुमानभवत् ॥ यः कामयेत प
शुमान्त्स्यामिति ॥ स पंचहोतारं प्रयुंजीत ॥ २ ॥ पशुमानेव भवति ॥ सोऽकामय
तर्तवो मे कल्पेरन्निति ॥ स पंचहोतुः षड्ढोतारं निरमिमीत ॥ तं प्रायुङ्क्त ॥ तस्य
प्रयुक्त्यृतवोऽस्मा अकल्पंत ॥ यः कामयेतर्तवो मे कल्पेरन्निति ॥ स षड्ढोतारं प्र
युंजीत ॥ कल्पंतेऽस्मा ऋतवः ॥ सोऽकामयत सोमपः सोमयाजी स्यां ॥ आ मे सो
मपः सोमपः सोमयाजी जायेतेति ॥ ३ ॥ स षड्ढोतुः सप्तहोतारं निरमिमीत ॥
तं प्रायुङ्क्त ॥ तस्य प्रयुक्ति सोमपः सोमयाज्यभवत् ॥ आस्य सोमपः सोमयाज्यजा

सांब्रू
२८

यत ॥ यः कामयेत सोमपः सोमयाजी स्यां ॥ आ मे सोमपः सोमयाजी जायेतेति ॥
स सप्तहोतारं प्रयुंजीत ॥ सोमप एव सोमयाजी भवति ॥ आस्य सोमपः सोमया
जी जायते ॥ स वा एष पशुः पंचधा प्रतितिष्ठति ॥ ४ ॥ पद्भिर्मुखेन ॥ ते देवाः प
शून्वित्वा ॥ सुवर्गं लोकमायन् ॥ ते मुष्मिँल्लोके व्यक्षुध्यन् ॥ ते ब्रुवन् ॥ अमुतः
प्रदानं वा उपजिजीविमेति ॥ ते सप्तहोतारं यज्ञं विधायायास्यं ॥ आंगीरसं
प्राहिण्वन् ॥ एतेनामुत्र कल्पयेति ॥ तस्य वा इयं कॢप्तिः ॥ ५ ॥ यदिदं किंच ॥
य एवं वेद ॥ कल्पतेऽस्मै ॥ स वा अयं मनुष्येषु यज्ञः सप्तहोता ॥ अमुत्र सद्भ्यो
देवेभ्यो हव्यं वहति ॥ य एवं वेद ॥ उपैनं यज्ञो नमति ॥ यो वै चतुर्होतॄणां निदा
नं वेद ॥ निदानवान्भवति ॥ अग्निहोत्रं वै दशहोतुर्निदानं ॥ दर्शपूर्णमा
सौ चतुर्होतुः ॥ चातुर्मास्यानि पंचहोतुः ॥ पशुबंधः षड्ढोतुः ॥ सौम्या

ब्रा० द्वि० २
२९

ध्वर्युः सप्तहोता ॥ एतद्वै चतुर्होतृणां निदानं ॥ य एवं वेद ॥ निदानवान्भवति ॥
॥ ६ ॥ अभिमीनतं प्रायुङ्क्त पंचहोतारं प्रयुंजीत जायेते तितिष्ठति कॢप्तिर्दशहो
तुर्निदानं सप्तच ॥ ११ ॥ प्रजापतिरकामयत प्रजाः सृजेयेति प्रजापतिरकाम
यत दर्शपूर्णमासौ सृजेयेति प्रजापतिरकामयत प्रजायेयेति स तपः सन्त्रितं
प्रजापतिरकामयत प्रजायेयेति स एतं दशहोतारं तेन दशधात्मानं देवा वै
वरुणं मंतो वै प्रजापतिस्ताः सृष्टाः समश्लिष्यं देवा वै चतुर्होतृभिरिदं वा अ
ये प्रजापतिरिंद्रं प्रजापतिरकामयत बहो भूयाने कादश ॥ ११ ॥ प्रजापति
स्तद्ध हस्य यहत्वं प्रजापतिरकामयता नये वै नत्त स्य वाङ्यं कॢप्तिस्तस्मात्ते
पानाञ्ज्योतिर्यदस्मिन्नादित्ये सषड्ढोतुः सप्तहोतारं त्रिसप्ततिः ॥ ७३ ॥

सां
२९

हरिः ओम् ॥ ॥ ब्रह्मवादिनो वदंति ॥ किं चतुर्होतृणां चतुर्होतृत्वमि
ति ॥ यद्देवेषु चतुर्धा होतारः ॥ तेन चतुर्होतारः ॥ तस्माच्चतुर्होतार उच्यंते ॥
तच्चतुर्होतृणां चतुर्होतृत्वं ॥ सोमो वै चतुर्होता ॥ अग्निः पंचहोता ॥ धाता
षड्ढोता ॥ इंद्रः सप्तहोता ॥ १ ॥ प्रजापतिर्दशहोता ॥ य एवं चतुर्होतृणामृद्धिं
वेद ॥ ऋध्नोत्येव ॥ य एषामेवं बंधुतां वेद ॥ बंधुमान्भवति ॥ य एषामेवं कॢप्तिं
वेद ॥ कल्पतेऽस्मै ॥ य एषामेवमायतनं वेद ॥ आयतनवान्भवति ॥ य एषा
मेवं प्रतिष्ठां वेद ॥ २ ॥ प्रत्येव तिष्ठति ॥ ब्रह्मवादिनो वदंति ॥ दशहोता च
तुर्होता ॥ पंचहोता षड्ढोता सप्तहोता ॥ अथ कस्माच्चतुर्होतार उच्यंत इ
ति ॥ इंद्रो वै चतुर्होता ॥ इंद्रः खलु वै श्रेष्ठो देवतानामुपदेशनात् ॥ य एव

ब्रा०द्वि०२
३०

मिंद्रं श्रेष्ठं देवतानामुपदेशनाद्वेद ॥ वसिष्ठः समानानां भवति ॥ तस्माच्छ्रे
ष्ठमायंतं प्रथमेनैवानुबुध्यंते ॥ अयमागन् ॥ अयमवासादिति ॥ कीर्ति
रस्य पूर्वा गच्छति जनतामायतः ॥ अथो एनं प्रथमेनैवानुबुध्यंते ॥ अयमा
गन् ॥ अयमवासादिति ॥ ३ ॥ सप्तहोता प्रतिष्ठां वेद बुध्यंते षड्ढ्च ॥ १ ॥
दक्षिणां प्रतिग्रहीष्यन्त्सप्तदशं हुत्वोपान्यात् ॥ आत्मानमेव समिंधे ॥
तेजसे वीर्याय ॥ अथो प्रजापतिरेवैनां भूत्वा प्रतिगृह्णाति ॥ आत्मनो ना
र्त्यै ॥ यद्येनमार्त्विज्याद्वृतं संतं निर्हरेरन् ॥ आग्नीध्रे जुहुयाद्दशहोता
रं ॥ चतुर्गृहीतेनाज्येन ॥ पुरस्तात्प्रत्यङ्ङ् तिष्ठन् ॥ प्रतिलोमं विग्राहं ॥ १ ॥
प्राणानेवास्योपदासयति ॥ यद्येनं पुनरुपशिक्षेयुः ॥ आग्नीध्र एव जु

सांब
३०

हुयाद्दशहोतारं ॥ चतुर्गृहीतेनाज्येन ॥ पश्चात्प्राङासीनः ॥ अनुलोममवि
ग्राहं ॥ प्राणानेवास्मै कल्पयति ॥ प्रायश्चित्ती वाग्घोता इत्यृतुमुखऋतुमुखे
जुहोति ॥ ऋतूनेवास्मै कल्पयति ॥ कल्पंतेस्मा ऋतवः ॥ २ ॥ क्लृप्ता अस्मा ऋ
तव आयंति ॥ षड्ढोता वै भूत्वा प्रजापतिरिदं सर्वमसृजत ॥ स मनोसृजत ॥
मनसोधि गायत्रीमसृजत ॥ तद्गायत्रीं यश आर्छत् ॥ तामालभत ॥ गाय
त्रिया अधि छंदांस्यसृजत ॥ छंदोभ्योधि साम ॥ तत्साम यश आर्छत् ॥ त
दालभत ॥ ३ ॥ साम्नोधि यजूंष्यसृजत ॥ यजुर्भ्योधि विष्णुं ॥ तद्विष्णुं
यश आर्छत् ॥ तमालभत ॥ विष्णोरध्योषधीरसृजत ॥ ओषधीभ्योधि
सोमं ॥ तत्सोमं यश आर्छत् ॥ तमालभत ॥ सोमादधि पशूनसृजत ॥ पशु

ब्रा०द्वि०२
३१

म्योधीर्द्व॥ ४ ॥ तदिंद्रंयश आर्छत्॥ तदेनंन्नातिप्राच्यवत॥ इंद्रइवयशस्वी
भवति॥ यएववेद॥ नैनंयशोतिप्रच्यवते॥ यद्वाइदंकिंच॥ तत्सर्वमुत्तानए
वांगीरसःप्रत्यगृह्णात्॥ तदेनंप्रतिगृहीतंन्नाहिनत्॥ यत्किंचप्रतिगृह्णी
यात्॥ तत्सर्वमुत्तानस्त्वांगीरसःप्रतिगृह्णात्वित्येवप्रतिगृह्णीयात्॥ इ
यंवाउत्तानआंगीरसः॥ अनयैवैनत्प्रतिगृह्णाति॥ बर्हिषाप्रतीयाद्गां
वाश्वंवा॥ एतद्वैपशूनांप्रियंधाम॥ प्रियेणैवैनंधाम्नाप्रत्यैति॥ ५ ॥ वि
याहमृत्यवस्वदालभुतंद्रंगृह्णीयात्षट्चं॥ २ ॥ योवाअविद्वान्निवर्तयते॥
विशीर्षासपाप्माऽमुष्मिंल्लोकेभवति॥ अथयोविद्वान्निवर्तयते॥ सशी
र्षाविपाप्माऽमुष्मिंल्लोकेभवति॥ देवतावैसप्तपुष्टिकामान्यवर्तयंत॥ अ

नैनंहिन
स्ति ॥५

सांबृ
३१

ग्निश्चपृथिवीच॥ वायुश्चांतरिक्षंच॥ आदित्यश्चद्यौश्च॥ चंद्रमाः॥ अग्निर्न्यवर्त
यत॥ ससाहस्रमपुष्यत्॥ पृथिवीन्यवर्तयत॥ सौषधीभिर्वनस्पतिभिरपुष्य
त्॥ वायुर्न्यवर्तयत॥ समरीचीभिरपुष्यत्॥ अंतरिक्षंन्यवर्तयत॥ तद्वयोभि
रपुष्यत्॥ आदित्योन्यवर्तयत॥ सरश्मिभिरपुष्यत्॥ द्यौर्न्यवर्तयत॥ सानक्ष
त्रैरपुष्यत्॥ चंद्रमान्यवर्तयत॥ सोहोरात्रैरर्धमासैर्मासैरृतुभिःसंवत्सरे
णापुष्यत्॥ तान्पोषान्पुष्यंति॥ यांस्तेपुष्यन्॥ यएवंविद्वान्निवर्तय
तेसरिंच॥ २ ॥ अपुष्यन्नक्षत्रैरपुष्यत्पंचंच॥ ३ ॥ तस्यवाअग्नेर्हिर
ण्यंप्रतिजग्रहुषः॥ अर्धमिंद्रियस्यापाक्रामत्॥ अतदेतेनैवप्रत्यगृह्णा
त्॥ तेनवैसोर्धमिंद्रियस्यात्मन्नुपाधत्त॥ अर्धमिंद्रियस्यात्मन्नुपाधत्ते॥

ब्रा० द्वि० २
३२

यएवंविद्वान्हिरण्यंप्रतिगृह्णाति॥ अथयोविद्वान्प्रतिगृह्णाति॥ अर्धमस्यें
द्रियस्यापक्रामति॥ तस्यैवैसोमस्यवासःप्रतिजग्रुक्रूषः॥ तृतीयमिंद्रियस्या
पाक्रामत्॥ १ ॥ तदेतेनैवप्रत्यगृह्णात्॥ तेनैवैसतृतीयमिंद्रियस्यात्मन्नुपा
धत्त॥ तृतीयमिंद्रियस्यात्मन्नुपाधत्ते॥ यएवंविद्वान्वासःप्रतिगृह्णाति॥ अ
थयोविद्वान्प्रतिगृह्णाति॥ तृतीयमस्येंद्रियस्यापक्रामति॥ तस्यैवैरुद्रस्य
गांप्रतिजग्रुक्रूषः॥ चतुर्थमिंद्रियस्यापाक्रामत्॥ तामेतेनैवप्रत्यगृह्णात्॥
तेनैवैसचतुर्थमिंद्रियस्यात्मन्नुपाधत्त॥ २ ॥ चतुर्थमिंद्रियस्यात्मन्नुपा
धत्ते॥ यएवंविद्वान्गांप्रतिगृह्णाति॥ अथयोविद्वान्प्रतिगृह्णाति॥ चतुर्थ
मस्येंद्रियस्यापक्रामति॥ तस्यैवैवरुणस्याश्वंप्रतिजग्रुक्रूषः॥ पंचममिंद्रि

साद्
३२

यस्यापाक्रामत्॥ तमेतेनैवप्रत्यगृह्णात्॥ तेनैवैसपंचममिंद्रियस्यात्मन्नु
पाधत्त॥ पंचममिंद्रियस्यात्मन्नुपाधत्ते॥ यएवंविद्वानश्वंप्रतिगृह्णाति॥ ३॥
अथयोविद्वान्प्रतिगृह्णाति॥ पंचममस्येंद्रियस्यापक्रामति॥ तस्यैवैप्रजाप
तेः पुरुषंप्रतिजग्रुक्रूषः॥ षष्ठमिंद्रियस्यापाक्रामत्॥ तमेतेनैवप्रत्यगृह्णा
त्॥ तेनैवैसषष्ठमिंद्रियस्यात्मन्नुपाधत्ते॥ षष्ठमिंद्रियस्यात्मन्नुपाधत्ते॥
यएवंविद्वान्पुरुषंप्रतिगृह्णाति॥ अथयोविद्वान्प्रतिगृह्णाति॥ षष्ठम
स्येंद्रियस्यापक्रामति॥ ४ ॥ तस्यैवैमनोस्तल्पंप्रतिजग्रुक्रूषः॥ सप्तम
मिंद्रियस्यापाक्रामत्॥ तमेतेनैवप्रत्यगृह्णात्॥ तेनैवैससप्तममिंद्रिय
स्यात्मन्नुपाधत्त॥ सप्तममिंद्रियस्यात्मन्नुपाधत्ते॥ यएवंविद्वांस्तल्पं

ब्रा० हि० २
३३

प्रतिगृह्णाति॥ अथयोविद्वान्प्रतिगृह्णाति॥ सप्तममस्येंद्रियस्यापक्रामति॥
तस्यवाउत्तानस्यांगीरसस्याप्राणत्प्रतिजग्रहुर्रूपः॥ अष्टममिंद्रियस्यापा
क्रामत्त॥ ५ ॥ तदेतेनैवप्रत्यगृह्णात्॥ तेनुवैसोष्टममिंद्रियस्यात्मन्नुपा
धत्त॥ अष्टममिंद्रियस्यात्मंनुपाधत्ते॥ यएवंविद्वानप्राणत्प्रतिगृह्णाति॥
अथयोविद्वान्प्रतिगृह्णाति॥ अष्टममस्येंद्रियस्यापक्रामति॥ यद्वाइदं
किंच॥ तत्सर्वमुत्तानएवांगीरसः प्रत्यगृह्णात्॥ तदेनंप्रतिगृहीतंनाहि
नत्॥ यत्किंचप्रतिगृह्णीयात्॥ तत्सर्वमुत्तानस्त्वांगीरसः प्रतिगृह्णा
त्वित्येवप्रतिगृह्णीयात्॥ इयंवाउत्तानआंगीरसः॥ अनयैवैनत्प्रतिगृ
ह्णाति॥ नेनंहिनस्ति॥ ६ ॥ तृतीयमिंद्रियस्यापाक्रामच्चतुर्थमिंद्रि

सां०ब्रा०
३३

यस्यात्मन्नुपाधत्ताश्वंप्रतिगृह्णातिषष्ठमस्येंद्रियस्यापक्रामत्सप्तममिंद्रि
यस्यापाक्रामत्प्रतिगृह्णीयाच्चत्वारिच॥ ४ ॥ ब्रह्मवादिनोवदंति॥ यद्दशहो
तारः सत्रमासत॥ केनतेगृहपतिनाभुर्वन्॥ केनप्रजाअसृजंतेति॥ प्रजा
पतिनावैतेगृहपतिनाभुर्वन्॥ तेनप्रजाअसृजंत॥ यच्चतुर्होतारः सत्रमा
सत॥ केनतेगृहपतिनाभुर्वन्॥ केनौषधीरसृजंतेति॥ सोमेनवैतेगृहप
तिनाभुर्वन्॥ १ ॥ तेनौषधीरसृजंत॥ यत्पंचहोतारः सत्रमासत॥ के
नतेगृहपतिनाभुर्वन्॥ केनैभ्योलोकेभ्योसुरान्प्राणुदंत॥ केनैषांपश्मून
वृंजतेति॥ अग्निनावैतेगृहपतिनाभुर्वन्॥ तेनैभ्योलोकेभ्योसुरान्प्राणु
दंत॥ तेनैषांपश्मूनवृंजत॥ यत्षड्ढोतारः सत्रमासत॥ केनतेगृहपतिना

ब्रा॰ द्वि॰
३४

र्ध्नुवन्॥ २ ॥ केनर्त्तनेकल्पयंतेति॥ धाता वै तेगृहपतिनार्ध्नुवन्॥ तेनर्त्तं नेकल्पयंत॥ यत्सप्तहोतारः सत्रमासत॥ केनतेगृहपतिनार्ध्नुवन्॥ केनसुवरायन्॥ केनेमाँल्लोकान्त्समतन्वन्निति॥ अर्यम्णा वै तेगृहपतिनार्ध्नुवन्॥ तेनसुवरायन्॥ तेनेमाँल्लोकान्त्समतन्वन्निति॥ ३ ॥ एते वै देवा गृहपतयः॥ तान्य एवं विद्वान्॥ अप्यन्यस्य गार्हपते दीक्षते॥ अवान्तरमेव सत्रिणामृध्नोति॥ यो वा अर्यमणं वेद॥ दानकामा अस्मै प्रजा भवंति॥ यज्ञो वा अर्यमा॥ आर्यावसुतिरिति वै तमाहुर्यं प्रशंसंति॥ आर्यावसुतिर्भवति॥ य एवं वेद॥ ४ ॥ यद्वा इदं किंच॥ तत्सर्वं चतुर्होतारः॥ चतुर्होतृभ्योधि यज्ञो निर्मितः॥ स य एवं विद्वान्विवदेत॥ अहमेव भूयो वे

सा॰ ब्र॰
३४

द॥ यश्चतुर्होतॄन्वेदेति॥ सर्वैव भूयो वेद॥ यश्चतुर्होतॄन्वेद॥ यो वै चतुर्होतॄणां होतॄन्वेद॥ सर्वासु प्रजास्वन्नमत्ति॥ ५ ॥ सर्वा दिशोभिजयति॥ प्रजापतिर्वै दशहोतॄणां होता॥ सोमश्चतुर्होतॄणां होता॥ अग्निः पंचहोतॄणां होता॥ धाता षड्ढोतॄणां होता॥ अर्यमा सप्तहोतॄणां होता॥ एते वै चतुर्होतॄणां होतारः॥ तान्य एवं वेद॥ सर्वासु प्रजास्वन्नमत्ति॥ सर्वा दिशोभिजयति॥ ॥ ६ ॥ आर्ध्नुवन्नार्ध्नुवन्निस्येवं वेदात्ति सर्वा दिशोभिजयति॥ ६ ॥ प्रजापतिः प्रजाः सृष्ट्वा व्यस्रंसत॥ स हृदयं भूतोशयत्॥ आत्मन्हा ३ इत्यह्वयत्॥ आपः प्रत्यशृण्वन्॥ ता अग्निहोत्रेणैव यज्ञक्रतुनोपपर्यावर्तंत॥ ताः कुसिंधमुपौहन्॥ तस्मादग्निहोत्रस्य यज्ञक्रतोः॥ एक ऋत्विक्॥ चतुष्क

ब्रा० द्वि० २
३५

लोकयत् ॥ अग्निर्वायुरादित्यश्चंद्रमाः ॥ १ ॥ ते प्रत्यश्रृण्वन् ॥ ते दर्शपूर्णमा
साभ्यामेव यज्ञक्रतुनोपपर्यावर्तंत ॥ तदुपोहंश्चत्वार्यंगानि ॥ तस्माद्दर्श
पूर्णमासयोर्यज्ञक्रतोः ॥ चत्वार ऋत्विजः ॥ पंचकृत्वोलोकयत् ॥ पशवः प्रत्य
श्रृण्वन् ॥ ते चातुर्मास्यैरेव यज्ञक्रतुनोपपर्यावर्तंत ॥ तदुपोहन्लोमच्छ
वीं मांसमस्थि मज्जानं ॥ तस्माच्चातुर्मास्यानां यज्ञक्रतोः ॥ २ ॥ पंच
र्त्विजः ॥ षट्कृत्वोलोकयत् ॥ ऋतवः प्रत्यश्रृण्वन् ॥ ते पशुबंधेनैव यज्ञ
क्रतुनोपपर्यावर्तंत ॥ तदुपोहन्त्वक्तनावाओशिश्नमवांचं प्राणं ॥ त
स्मात्पशुबंधस्य यज्ञक्रतोः ॥ षडृत्विजः ॥ सप्तकृत्वोलोकयत् ॥ होत्राः प्र
त्यश्रृण्वन् ॥ ताः सौम्येनैवाध्वरेण यज्ञक्रतुनोपपर्यावर्तंत ॥ ३ ॥ ताउ

सां० २
३५

पोहन्त्सप्तशीर्षण्यान्प्राणान् ॥ तस्मात्सौम्यस्याध्वरस्य यज्ञक्रतोः ॥ सप्त
होत्राः प्राचीर्वषट् कुर्वंति ॥ दशकृत्वोलोकयत् ॥ तपः प्रत्यश्रृणोत् ॥ तत्कर्मणे
व संवत्सरेण सर्वैर्यज्ञक्रतुभिरुपपर्यावर्तंत ॥ तत्सर्वमात्मानमपरिवर्गमु
पोहत् ॥ तस्मात्संवत्सरे सर्वे यज्ञक्रतवोऽवरुध्यंते ॥ तस्माद्दशहोता चतु
र्होता ॥ पंचहोता षड्ढोता सप्तहोता ॥ एकहोत्रे बलिं हरंति ॥ हरंत्य
स्मै प्रजा बलिं ॥ ऐनमप्रतिख्यातं गच्छति ॥ य एवं वेद ॥ ४ ॥ चंद्रमाश्चा
तुर्मास्यानां यज्ञक्रतोरध्वरेण यज्ञक्रतुनोपपर्यावर्तंत सप्तहोता च
त्वारि च ॥ ६ ॥ प्रजापतिः पुरुषमसृजत ॥ सोऽग्निरब्रवीत् ॥ ममायम
न्नमस्त्विति ॥ सोऽबिभेत् ॥ सर्वं वै मायं प्रधक्ष्यतीति ॥ स एताꣳश्चतुर्हो

ब्रा०द्वि०२
३६

तृणा त्सुस्परणा न पश्यत ॥ तानजुहोत ॥ तैर्वै स आत्मानमस्पृणोत ॥ यदग्निहोत्रं जुहोति ॥ एकहोतारमेव तद्यज्ञक्रतुमाप्नोत्यग्निहोत्रं ॥ १ ॥ कुसिंधं चात्मनस्पृणोति ॥ आदित्यस्य च सायुज्यं गच्छति ॥ चतुरुन्नेयति ॥ चतुर्होतारमेव तद्यज्ञक्रतुमाप्नोति दर्शपूर्णमासौ ॥ चत्वारि चात्मनोंगानि स्पृणोति ॥ आदित्यस्य च सायुज्यं गच्छति ॥ चतुरुन्नेयति ॥ समित्पंचमी ॥ पंचहोतारमेव तद्यज्ञक्रतुमाप्नोति चातुर्मास्यानि ॥ लोम छवींमांसमस्थिमज्जानं ॥ २ ॥ तानि चात्मनस्पृणोति ॥ आदित्यस्य च सायुज्यं गच्छति ॥ चतुरुन्नेयति ॥ द्विर्जुहोति ॥ षड्ढोतारमेव तद्यज्ञक्रतुमाप्नोति पशुबंधं ॥ स्तनावांडौ शिश्नमवांचं प्राणं ॥ तानि चा

सांवृ०
३६

त्मनस्पृणोति ॥ आदित्यस्य च सायुज्यं गच्छति ॥ चतुरुन्नेयति ॥ द्विर्जुहोति ॥ ३ ॥ समित्सप्तमी ॥ सप्तहोतारमेव तद्यज्ञक्रतुमाप्नोति सौम्यमध्वरं ॥ सप्त चात्मनः शीर्षण्यान्प्राणान्त्स्पृणोति ॥ आदित्यस्य च सायुज्यं गच्छति ॥ चतुरुन्नेयति ॥ द्विर्जुहोति ॥ द्विर्निमार्ष्टि ॥ द्विः प्राश्नाति ॥ दशहोतारमेव तद्यज्ञक्रतुमाप्नोति संवत्सरं ॥ सर्वं चात्मानमपरिवर्गं स्पृणोति ॥ आदित्यस्य च सायुज्यं गच्छति ॥ ४ ॥ अग्निहोत्रमुज्जानं द्विर्जुहोत्यपरिवर्गं स्पृणोत्येकं च ॥ ७ ॥ अपक्रामत गर्भिण्यः ॥ ॥ प्रजापतिरकामयत प्रजायेयेति ॥ स तपोतप्यत ॥ सोंतर्वानभवत् ॥ स हरितः श्यावोभवत् ॥ तस्मात्स्त्र्यंतर्वत्नी ॥ हरिणी सती श्यावा भवति ॥ स विजायमानो गर्भेणा

× वत्स

ब्रा० द्वि० ३
३७

तान्यमत्॥ स तांतः कृष्णःश्यावो भवत्॥ तस्मात्तांतः कृष्णःश्यावो भवति॥
तस्यासुरिवाजीवत्॥ १॥ तेनासुनासुरान सृजत॥ तदसुराणामसुरत्वं॥
यएवमसुराणामसुरत्वंवेद॥ असुमानेवभवति॥ नैनमसुर्जहाति॥ सो
सुरान्त्सृष्ट्वापितेवामन्यत॥ तदनुपितॄनसृजत॥ तत्पितॄणांपितृत्वं॥ य
एवंपितॄणांपितृत्वंवेद॥ पितेवैवस्वानो भवति॥ २॥ यंत्यस्यपितरो ह
वं॥ सपितॄन्त्सृष्ट्वामनस्यत॥ तदनुमनुष्यानसृजत॥ तन्मनुष्याणा
मनुष्यत्वं॥ यएवंमनुष्याणांमनुष्यत्वंवेद॥ मनस्व्येवभवति॥ नैनं
मनुर्जहाति॥ तस्मैमनुष्यान्त्ससृजानाय॥ दिवादेवत्राभवत्॥ तदनु
देवानसृजत॥ तद्देवानांदेवत्वं॥ यएवंदेवानांदेवत्वंवेद॥ दिवांहैवा

सांवृ
३७

द्वभ

स्यदेवत्राभवति॥ तानिवाएतानिचत्वार्यंभांसि॥ देवामनुष्याःपितरोसुराः॥
तेषुसर्वेष्वंभोनभवति॥ यएवंवेद॥ अजीवत्स्वानांभवतिदेवानेस्र ज्ञत सप्त
चे॥ ८॥ यथास्थानंगर्भिण्यः॥ ॥ ब्रह्मवादिनोवदंति॥ योवाइमंविद्या
त्॥ यतोयंपवते॥ यदभिपवते॥ यदभिसंपवते॥ सर्वमायुरियात्॥ नपु
रायुषःप्रमीयेत॥ पशुमान्त्स्यात्॥ विंदेतप्रजां॥ योवाइमंवेद॥ १॥ यतो
यंपवते॥ यदभिपवते॥ यदभिसंपवते॥ सर्वमायुरेति॥ नपुरायुषःप्रमी
यते॥ पशुमान्भवति॥ विंदतेप्रजां॥ अद्भ्यःपवते॥ अपोभिपवते॥ अपो
भिसंपवते॥ २॥ अस्याःपवते॥ इमामभिपवते॥ इमामभिसंपवते॥ अ॰सं
ग्नेःपवते॥ अग्निमभिपवते॥ अग्निमभिसंपवते॥ अंतरिक्षात्पवते॥

ब्रा०छ्रि०२
३८

अंतरिक्षमभिपवति ॥ अंतरिक्षमभिसंपवते ॥ आदित्यात्पवते ॥ ३ ॥ आदि
त्यमभिपवते ॥ आदित्यमभिसंपवते ॥ द्योः पवते ॥ दिवमभिपवते ॥ दिवमभि
संपवते ॥ दिग्भ्यः पवते ॥ दिशोभिपवते ॥ दिशोभिसंपवते ॥ सयत्पुरस्ता
द्वाति ॥ प्राणएवभूत्वापुरस्ताद्वाति ॥ ४ ॥ तस्मात्पुरस्ताद्वांतं ॥ सर्वाः प्रजाः
प्रतिनंदंति ॥ प्राणोहिप्रियः प्रजानां ॥ प्राणइवप्रियः प्रजानां भवति ॥ यए
वंवेद ॥ सवाएषप्राणएव ॥ अथयद्दक्षिणतोवाति ॥ मातरिश्वैवभूत्वाद
क्षिणतोवाति ॥ तस्माद्दक्षिणतोवांतंविद्यात् ॥ सर्वादिशआवाति ॥ ५ ॥
सर्वादिशोनुविवाति ॥ सर्वादिशोनुसंवातीति ॥ सवाएषमातरिश्वैव ॥ अ
थयत्पश्चाद्वाति ॥ पवमानएवभूत्वापश्चाद्वाति ॥ पूतमस्माआहरंति ॥ पू

सांब्र
३८

तमुपहरंति ॥ पूतमश्नाति ॥ यएवंवेद ॥ सवाएषपवमानएव ॥ ६ ॥ अथय
दुत्तरतोवाति ॥ सवितेवभूत्वोत्तरतोवाति ॥ सवितेवस्वानां भवति ॥ यएवं
वेद ॥ सवाएषसवितैव ॥ तेयएनंपुरस्तादायंतमुपवदंति ॥ यएवास्यपु
रस्तात्पाप्मानः ॥ तांस्तेपघ्नंति ॥ पुरस्तादितरान्पाप्मानः सचंते ॥ अथ
यएनंदक्षिणतआयंतमुपवदंति ॥ ७ ॥ यएवास्यदक्षिणतः पाप्मानः ॥
तांस्तेपघ्नंति ॥ दक्षिणतइतरान्पाप्मनः सचंते ॥ अथयएनंपश्चादायं
तमुपवदंति ॥ यएवास्यपश्चात्पाप्मानः ॥ तांस्तेपघ्नंति ॥ पश्चादितरा
न्पाप्मनः सचंते ॥ अथयएनमुत्तरतआयंतमुपवदंति ॥ यएवास्योत्त
रतः पाप्मानः ॥ तांस्तेपघ्नंति ॥ ८ ॥ उत्तरतइतरान्पाप्मनः सचंते ॥ तस्मा

स्यो

देवंविद्वान्॥वीवनृत्येत॥प्रेवचलेत्॥व्यसेवाक्षौभावेत॥मुंटयेदिव॥क्राथयेदिव॥श्रृंगायेतेव॥उतमोपवदेयुः॥उतमेपाप्मानमपहन्युरिति॥
॥९॥सयांदिशंसुनिमेष्यन्स्यात्॥यदातांदिशंवातोवायात्॥अथप्रवेयात्॥प्रवाधावयेत्॥सान्तमेवरदितंव्यूढंगंधमभिप्रच्यवते॥आस्यतंजनपदंपूर्वाकीर्तिर्गच्छति॥दानकामाअस्मैप्रजाभवंति॥यएवंवेद॥
॥१॥वेदसंपवतआदित्यात्सवतेवात्यावात्येषपवमानएवदक्षिणतआयंतमुपवदंतियएवास्योत्तरतःपाप्मानःस्ताःस्तेपघ्नंतीत्युक्तोच॥ ९॥
प्रजापतिःसोमंराजानमसृजत॥तंत्रयोवेदाअन्वसृज्यंत॥तान्हस्तेकुरुत॥अथहसीतासावित्री॥सोमंराजानंचकमे॥श्रद्धामुसचकमे॥

साहपितरंप्रजापतिमुपससार॥तंहोवाच॥नमस्तेअस्तुभगवः॥उपत्वायानि॥प्रत्वापद्ये॥सोमंवैराजानंकामये॥श्रद्धामुसकामयतइति॥तस्याउहस्थागरमलंकारंकल्पयित्वा॥दशहोतारंपुरस्ताद्व्याख्याय॥चतुर्होतारंदक्षिणतः॥पंचहोतारंपश्चात्॥षड्ढोतारमुत्तरतः॥सप्तहोतारमुपरिष्टात्॥संभारैश्चपत्निभिश्चमुखेलंकृत्य॥ २॥आस्याधेवव्राज॥तांहोदीक्ष्योवाच॥उपमावर्तस्वेति॥तंहोवाच॥भोगंतुमआचक्ष्व॥एतन्मआचक्ष्व॥यत्तेपाणाविति॥तस्याउहत्रीन्वेदान्प्रददौ॥तस्मादुहस्त्रियोभोगमेवहारयंते॥सयःकामयेतप्रियःस्यामिति॥ ३॥यंवाकामयेतप्रियःस्यादिति॥तस्माएतंस्थागरमलं

कारंकल्पयित्वा॥ दशहोतारंपुरस्ताद्व्याख्याय॥ चतुर्होतारंदक्षिणतः॥
पंचहोतारंपश्चात्॥ षड्ढोतारमुत्तरतः॥ सप्तहोतारमुपरिष्टात्॥ संभारै
श्चपत्निभिश्चमुखेलंकृत्य॥ आस्यार्धमजेत्॥ प्रियोहैवभवति॥ ४॥
अथान्यलंकृतस्याभितिभवति॥ १०॥ ब्रह्मात्मन्वदसृजत॥ तदकाम
यत॥ समात्मनापद्येयेति॥ आत्मन्नात्मन्नित्यामंत्रयत॥ तस्मैदशमं
हूतः प्रत्यश्रृणोत्॥ सदशहूतोभवत्॥ दशहूतोहवैनामैषः॥ तंवाएतंद
शहूतंसंतं॥ दशहोतेत्याचक्षतेपरोक्षेण॥ पुरोक्षप्रियाइवहिदेवाः॥
॥ १॥ आत्मन्नात्मन्नित्यामंत्रयत॥ तस्मैसप्तमंहूतः प्रत्यश्रृणोत्॥ स
सप्तहूतोभवत्॥ सप्तहूतोहवैनामैषः॥ तंवाएतंसप्तहूतंसंतं॥ सप्त

होतेत्याचक्षतेपरोक्षेण॥ परोक्षप्रियाइवहिदेवाः॥ आत्मन्नात्मन्नित्यामं
त्रयत॥ तस्मैषष्ठंहूतः प्रत्यश्रृणोत्॥ सषड्ढूतोभवत्॥ षड्ढूतोहवैनामैषः॥
तंवाएतंषड्ढूतंसंतं॥ षड्ढोतेत्याचक्षतेपरोक्षेण॥ परोक्षप्रियाइवहिदे
वाः॥ आत्मन्नात्मन्नित्यामंत्रयत॥ तस्मैपंचमंहूतः प्रत्यश्रृणोत्॥ सपं
चहूतोभवत्॥ पंचहूतोहवैनामैषः॥ तंवाएतंपंचहूतंसंतं॥ पंचहोते
त्याचक्षतेपरोक्षेण॥ ३॥ परोक्षप्रियाइवहिदेवाः॥ आत्मन्नात्मन्नित्या
मंत्रयत॥ तस्मैचतुर्थंहूतः प्रत्यश्रृणोत्॥ सचतुर्हूतोभवत्॥ चतुर्हूतो
हवैनामैषः॥ तंवाएतंचतुर्हूतंसंतं॥ चतुर्होतेत्याचक्षतेपरोक्षेण॥ प
रोक्षप्रियाइवहिदेवाः॥ तमब्रवीत्॥ त्वंवैमेनेदिष्ठंहूतः प्रत्यश्रौषीः॥

त्वयैनाना ख्यातार इति॥ तस्मान्नु हैनाः श्वत्तु र्हीतार इत्याचक्षते॥ तस्मान्नु
श्रूषुः पुत्राणाः हृद्यतमः॥ नेदिष्ठोहृद्यतमः॥ नेदिष्ठो ब्रह्मणो भवति॥ य
एवंवेद॥ ४॥ द्वेवाः षड्ढ्तो भवत्वं चहोनेत्याचक्षते परोक्षेणाश्रोषीः षड्
चे॥ ११॥ ॥ब्रह्मवादिनः किंदक्षिणांयोकाअविद्वान्तस्यैवे ब्रह्मवादि
नोयद्दशहोतारः प्रजापतिर्य्यत्रं प्रजापतिः पुरुषं प्रजापतिरकामय
तप्रजायेयेति सतपः सोंतर्वान्ब्रह्मवादिनोयोवाद्मंविद्यात्प्रजापतिः
सोमः राजानं ब्रह्मान्वदसृजतैकादश॥ ११॥ ॥ब्रह्मवादिनस्त
स्यवाअग्नेर्हिरण्ययह्वाद्दंकिंच प्रजापतिरकामयतस तपः सोंतर्वा
न्यएवास्य दक्षिणतः पंचाशात्॥ ।५०॥ ७॥ हरिः ओम्॥ ॥श्रीसांब॥

हरिः ओम्॥ ॥जुष्टोदमूना अतिथिर्दुरोणे॥ इमन्नोयज्ञमुपयाहिविद्वान्॥
विश्वाअग्नेअभियुजोविहत्य॥ शत्रूयतामाभराभोजनानि॥ अग्नेशोर्धम
हतेसोभगाय॥ तवद्युम्नान्युत्तमानि संतु॥ संजास्पत्यः सुयममाकृणु
ष॥ शत्रूयतामभितिष्ठा महांसि॥ अग्नेयोनोभितोजनः॥ वृकोवा
राजिघांसति॥ १॥ तांः स्त्वंवृत्रहंजहि॥ वस्वस्मभ्यमाभर॥ अग्ने
योनोभिदासति॥ समानोयश्चनिष्ट्यः॥ इध्मस्येवप्रक्षायतः॥ मात
स्याछेषिकिंचन॥ त्वमिंद्राभिभूरसि॥ देवोविज्ञातवीर्यः॥ अपप्राच
इंद्रविश्वांः अमित्रान्॥ २॥ अपापाचोअभिभूतेनुदस्व॥ वृत्रहापुरुचेतनः॥
अपोदीचोअपशूराधराचउरो॥ यथातवशर्मन्मदेम॥ तमिंद्रंवा

ब्रा०हिं०४
५२

जयामसि॥ महेवृत्राय हंतवे॥ स वृषा वृषभो भुवत्॥ युजे रथं गवेषणं
हरिभ्यां॥ उप ब्रह्माणि जुजुषाणमस्थुः॥ वि बाधिष्टा स्य रोदसी महित्वा॥
इंद्रो वृत्राण्यप्रती जघन्वान्॥ ३॥ हव्यवाहमभिमातिषाहं॥ रक्षोहणं पृ
तनासु जिष्णुं॥ ज्योतिष्मंतं दीद्यतं पुरंधिं॥ अग्निं स्विष्टकृतमाहुवेम॥
स्विष्टमग्ने अभि तत्पृणाहि॥ विश्वा देव पृतना अभिष्य॥ उरुं नः पंथां
प्रदिशन्विभाहि॥ ज्योतिष्मद्धेह्यजरन्न आयुः॥ त्वामग्ने हविष्मंतः॥ दे
वं मर्तास ईळते॥ ४॥ मन्ये त्वा जातवेदसं॥ स हव्या वक्ष्यानुषक्॥ वि
श्वानि नो दुर्गहा जातवेदः॥ सिंधुं न नावा दुरितातिपर्षि॥ अग्ने अत्रि
वन्मनसा गृणानः॥ अस्माकं बोध्यविता तनूनां॥ पूषा गा अन्वेतु नः॥

सांवृ
५२

पूषा रक्षत्वर्वतः॥ पूषा वाजं सनोतु नः॥ पूषेमा आशा अनुवेद सर्वाः॥ ५॥
सो अस्माँ अभयतमेन नेषत्॥ स्वस्तिदा आघृणिः सर्ववीरः॥ अप्रयुच्छन्
पुर एतु प्रजानन्॥ त्वमग्ने सप्रथा असि॥ जुष्टो होता वरेण्यः॥ त्वया यज्ञं
वितन्वते॥ अग्नी रक्षांसि सेधति॥ शुक्रशोचिरमर्त्यः॥ शुचिः पावक ई
ड्यः॥ अग्ने रक्षाणो अंहसः॥ ६॥ प्रतिष्म देव रीषतः॥ तपिष्ठैरजरो दह॥
अग्ने हंसि न्यत्रिणं॥ दीद्यन्मर्त्येष्वा॥ स्वे क्षये शुचिव्रत॥ आ वात वाहि
भेषजं॥ वि वात वाहि यद्रपः॥ त्वं हि विश्वभेषजः॥ देवानां दूत ईयसे॥
द्वाविमौ वातौ वातः॥ ७॥ आ सिंधोरा परावतः॥ दक्षं मे अन्य आवातु॥
परान्यो वातु यद्रपः॥ यददो वात ते गृहे॥ अमृतस्य निधिर्हितः॥ ततो नो

देहिजीवसे॥ ततोनोधेहिभेषजं॥ ततोनोमह्यआवह॥ वातआवातुभेषजं॥
शंभूर्मयोभूर्नोहृदे॥ ८॥ प्रणआयूंषितारिषत्॥ त्वमग्नेअयासि॥ अया
सन्मनसाहितः॥ अयासन्हव्यमूहिषे॥ अयानोधेहिभेषजं॥ इष्टोअग्नि
राहुतः॥ स्वाहाकृतः पिपर्तुनः॥ स्वगादेवेभ्यइदंनमः॥ कामोभूतस्यभव्य
स्य॥ सम्राडेकोविराजति॥ ९॥ सइदंप्रतिपप्रथे॥ ऋतून्नुत्सृजतेवशी॥
कामस्तदग्रेसमवर्तताधि॥ मनसोरेतः प्रथमंयदासीत्॥ सतोबंधुमसति मं
निरविंदन्॥ हृदिप्रतीष्याकवयोमनीषा॥ त्वयामन्योसरथमारुजंतः॥
हर्षमाणासोधृषितामरुत्वः॥ तिग्मेषवआयुधासंशिशानाः॥ उपप्र
यंतुतिनरोअग्निरूपाः॥ १०॥ मन्युर्भगोमन्युरेवासदेवः॥ मन्युर्होताव

रुणोविश्ववेदाः॥ मन्युंविशाईउतेदेवयंतीः॥ पाहिनोमन्योतपसाश्रमेण॥ त्व
मग्नेव्रतभृच्छुचिः॥ देवांआसादयाइह॥ अग्नेहव्यायवोढवे॥ व्रतानुबि
भ्रद्व्रतपाअदाभ्यः॥ यजानोदेवांअजरः सुवीरः॥ दधद्रत्नानिसुविदानोअ
ग्ने॥ गोपायनोजीवसेजातवेदः॥ ११॥ जिघांसत्यमित्रांजघन्वानीउतेस
र्वाअंहसोवालोहृदेराजत्यग्निरूपाः सुविदानोअग्नएकंच॥ १॥ चक्ष
षोहेतेमनसोहेते॥ वाचोहेतेब्रह्मणोहेते॥ योमाघायुरभिदासति॥ तम
ग्नेमेन्यामेनिंकृणु॥ योमाचक्षषायोमनसा॥ योवाचाब्रह्मणाघायुर
मे भिदासति॥ तयाग्नेत्वंमेन्या॥ अमुमेनिंकृणु॥ यत्किंचासौमनसायच्च
वाचा॥ यज्ञैर्जुहोतियजुषाहविर्भिः॥ २॥ तन्मृत्युर्निर्ऋत्यासंविदानः॥

श्री

ब्रा० द्वि० ४
५४

पुरादिष्टाँकुतीरस्य हंतु॥ यातुधानानिर्ऋतिराडुरक्षः॥ तेभस्यघ्नं त्वनृतेन
सुत्यं॥ इंद्रेषिता आज्यमस्य मथ्नंतु॥ मातत्सं मृद्धियदसौ करोति॥ हन्मि
तेहंकृतं हविः॥ योमेघोरमचीकृतः॥ अपांचौत उभौ बाहू॥ अपनह्याम्या
स्यं॥ २॥ अपनह्यामिते बाहू॥ अपनह्याम्यास्यं॥ अग्नेर्देवस्य ब्रह्मणा॥
सर्वं तेवधिषंकृतं॥ पुरामुष्य वषट्कारात्॥ यज्ञं देवेषु नस्कृधि॥ स्विष्टम
स्माकं भूयात्॥ मास्मात्प्रापन्नरातयः॥ अंतिदूरेसतोअग्ने॥ भ्रातृव्यस्या
भिदासतः॥ ३॥ वषट्कारेणवज्रेण॥ कृत्याः हन्मिकृताग्रहं॥ योमान
कंदिवासायं॥ प्रातश्चाह्नोनिपीयति॥ अद्यानमिंद्रवज्रेण॥ भ्रातृव्यंपा
दयामसि॥ इंद्रस्य गृहोसिनंत्वा॥ प्रपद्येसगुः सार्श्वः॥ सहयन्मेअस्तिते

सांव
५४

न॥ ईडे अग्निं विपश्चितं॥ ४॥ गिरायज्ञस्य साधनं॥ श्रुष्टीवानंधितावानं॥
अग्नेशाकेमतेवयं॥ यमंदेवस्य वाजिनः॥ अतिद्वेषांसितरेम॥ अवतंमास
मनसोसमोकसौ॥ सचेतसौसरेतसौ॥ उभौमामवतंजातवेदसौ॥ शिवौ
भवतमद्यनः॥ स्वयंकृण्वानः सुगमप्रयावं॥ ५॥ तिग्मशृंगोवृषभः शो
शुचानः॥ प्रत्नं सधस्थमनुपश्यमानः॥ आतंतुमग्निर्दिव्यंततान॥ त्वं
नस्तंतुरुतसेतुरग्ने॥ त्वंपंथाभवसिदेवयानः॥ त्वयाग्नेपृष्ठंवयमारु
हेम॥ अथादेवैः सधमादंमदेम॥ उदुत्तमंमुमुग्धिनः॥ विपाशंमध्यमंचृ
त॥ अवाधमानिजीवसे॥ ६॥ वयंसोमव्रतेतव॥ ममस्तनूषुबिभ्र
तः॥ प्रजावंतोअशीमहि॥ इंद्राणीदेवीसुभगासुपत्नी॥ उदंशेनपति

ब्रा०द्वि०
४५

विद्वेजिगाय ॥ त्रिंशदस्याजघनंयोजनानि ॥ उपस्थइंद्रं स्थविरंबिभर्ति ॥
सेनाहनामपृथिवीधनंजया ॥ विश्वव्यचाअदितिः सूर्यत्वक् ॥ इंद्राणीदेवी
प्रासहादधाना ॥ ७ ॥ सानोदेवीसुहवाशर्मयच्छतु ॥ आत्वाहार्षमंतरभूः ॥
ध्रुवस्तिष्ठाविचाचलिः ॥ विशस्त्वासर्वावांछंतु ॥ मात्वद्राष्ट्रमधिभ्रशत् ॥
ध्रुवाद्यौर्ध्रुवापृथिवी ॥ ध्रुवंविश्वमिदंजगत् ॥ ध्रुवाहपर्वताइमे ॥ ध्रुवोरा
जाविशामयं ॥ इहैवैधिमाव्यथिष्ठाः ॥ ८ ॥ पर्वतइवाविचाचलिः ॥ इंद्र
इवेहध्रुवस्तिष्ठ ॥ इहराष्ट्रमुधारय ॥ अभितिष्ठपृतन्यतः ॥ अधरेसंतु
शत्रवः ॥ इंद्रइववृत्रहातिष्ठ ॥ अपः क्षेत्राणिसंजयन् ॥ इंद्रेण मदीध
रत् ॥ ध्रुवंध्रुवेणहविषा ॥ तस्मैदेवाअधिब्रवन् ॥ अयंचब्रह्मणस्पतिः ॥ ९ ॥

सांव
४५

हविर्भिरास्यमभिदासतोविपश्चितमप्रयावंजीवसेददानाव्यथिष्ठाअवेन्ने
केच ॥ २ ॥ जुष्टीनरोब्रह्मणावः पितृणां ॥ अक्षमव्ययन्नकिलारिषाथ ॥ य
च्छक्करीषुबृहतारवेण ॥ इंद्रेशुष्ममदधाथावसिष्ठाः ॥ पावकानः सरस्वती ॥ वा
जेभिर्वाजिनीवती ॥ यज्ञंवष्टुधियावसुः ॥ सरस्वत्यभिनोनेषिवस्यः ॥ माप
स्फरीः पयसामानआधक् ॥ जुषस्वनः सख्यावेश्याच ॥ १ ॥ मात्वत्क्षेत्रा
ण्यरणानिगन्म ॥ वृंजेहविर्नमसाबर्हिरग्नौ ॥ अयामिस्रुग्घृतवती
सुवृक्तिः ॥ अम्यक्षिसद्मसदनेपृथिव्याः ॥ अश्रायियज्ञः सूर्येनचक्षुः ॥
इहार्वांचमतिह्वये ॥ इंद्रंजैत्रायजेतवे ॥ अस्माकमस्तुकेवलः ॥ अर्वांच
मिंद्रममुतोहवामहे ॥ योगोजिद्धनजिदश्वजिद्यः ॥ २ ॥ इमंनोयज्ञंवि

धा ३

।श्रा०हि०
४६

हव्येजुषेस्व॥ अस्यकुर्मोहरिवोमेदिनंत्वा॥ असंमृष्टोजायसेमात्रोः शुचिः॥
मंद्रः कविरुदतिष्ठोविवस्वतः॥ घृतेनत्वावर्धयन्नग्नआहुत॥ धूमस्तेके
तुरभवद्दिविश्रितः॥ अग्निरग्रेप्रथमोदेवतानां॥ संयातानामुत्तमोवि
ष्णुरासीत्॥ यजमानायपरिगृह्यदेवान्॥ दीक्षयेदंहविरागछतंनः॥
॥ ३ ॥ अग्निश्चविष्णोतपउत्तमंमहः॥ दीक्षापालेभ्योवनतंहिशक्रा॥
विश्वैर्देवैर्यज्ञियैः संविदानौ॥ दीक्षामस्मैयजमानायधत्तं॥ प्रतद्विष्णु
स्तवतेवीर्याय॥ मृगोनभीमः कुचरोगिरिष्ठाः॥ यस्योरुषुत्रिषुविक्र
मणेषु॥ अधिक्षियंतिभुवनानिविश्वा॥ नूमर्तोदयतेसनिष्यन्यः॥ वि
ष्णवउरुगायायदाशत्॥ ४ ॥ प्रयः सत्राचामनसायजाते॥ एतावंतं

सांबृ
५६

नर्यमाविवासात्॥ विचक्रमेपृथिवीमेषएतां॥ क्षेत्रायविष्णुर्मनुषेदशस्यन्॥
ध्रुवासोअस्यकीरयोजनासः॥ उरुक्षितिंसुजनिमाचकार॥ त्रिर्देवः पृथिवी
मेषएतां॥ विचक्रमेशतर्चसंमहित्वा॥ प्रविष्णुरस्तुतवसस्तवीयान्॥ त्वेषं
ह्यस्यस्थविरस्यनाम॥ ५ ॥ होतारंचित्ररथमध्वरस्य॥ यज्ञस्ययज्ञस्यके
तुंरुशंतं॥ प्रत्यर्धिंदेवस्यदेवस्यमह्ना॥ श्रियात्वग्निमतिथिंजनानां॥ आ
नोविश्वाभिरूतिभिः सजोषाः॥ ब्रह्मजुषाणोहर्यश्वयाहि॥ वरीवृजत्स्थ
विरेभिः सुशिप्र॥ अस्मेदधद्वृषणंशुष्ममिंद्र॥ इंद्रः सुवर्षाजनयन्नहा
नि॥ जिगायोशिग्भिः पृतनाअभिष्टीः॥ ६ ॥ प्रारोचयन्मनवेकेतुमह्नां॥
अविंदज्ज्योतिर्बृहतेरणाय॥ अश्विनावर्वसेनिह्वयेवां॥ आनूनंयातं

सुहुतायविश्या॥ प्रातर्युक्तेन सुवृता रथेन॥ उपागच्छतमवसागतंनः॥ अवि
ह्वथीमश्विनानआसु॥ प्रजावद्रेतोअह्रयन्नोअस्तु॥ आवांनोकेतनयेतूतु
जानाः॥ सुरत्नासो देववीतिंगमेम॥ ७॥ त्वंसोमक्रतुभिः सुक्रतुर्भूः॥
त्वंदक्षैः सुदक्षोविश्ववेदाः॥ त्वंवृषावृषत्वेभिर्महित्वा॥ द्युम्नेभिर्द्युम्न्यभ
वोनृचक्षाः॥ अषाढंयुत्सु पृतनासुपप्रिं॥ सुवर्षामप्स्वांवृजनस्यगोपां॥
भरेषुजांसुक्षितिंसुश्रवसं॥ जयंतंत्वामनुमदेमसोम॥ भवामित्रोन
शेव्योघृतासुतिः॥ विभूतद्युम्नएवयाउसप्रथाः॥ ८॥ अधातेविष्णोवि
दुषाचिदृध्यः॥ स्तोमोयज्ञस्यराध्योहविष्मतः॥ यःपूर्व्यायवेधसेनवीय
से॥ सुमज्जानयेविष्णवेददाशति॥ योजातमस्यमहतोमहिब्रवात्॥

सेदुश्रवोभिर्युज्यंचिदभ्यसत्॥ तमुस्तोतारः पूर्व्यंयथाविद ऋतस्य॥ ग
र्भंहविषापिपर्तन॥ आस्यजानंतोनामचिद्विवक्तन॥ बृहत्तेविष्णोसुमतिं
भजामहे॥ ९॥ इमाधानाघृतस्नुवः॥ हरीइहोपवक्षतः॥ इंद्रंसुखतमे
रथे॥ एषब्रह्माप्रतेमहे॥ विदथेशंसिषंहरी॥ यऋत्वियःप्रतेवन्वे॥ व
नुषोहर्यतंमदं॥ इंद्रोनामघृतंनयः॥ हरिभिश्चारुसेचते॥ श्रुतोगणआ
त्वाविशंतु॥ १०॥ हरिवर्पसंगिरः॥ आचर्षणिप्रावृषभोजनानां॥ राजाकृष्टी
नांपुरुहूतइंद्रः॥ स्तुतःश्रवस्यन्नवसोपमद्रिक्॥ युक्त्वाहरीवृषणायाह्यर्वाङ्॥ प्रयत्सिंधवःप्रसवंयदायन्॥ आपःसमुद्रंरथ्येवजग्मुः॥ अ
तश्चिदिंद्रःसदसोवरीयान्॥ यदींसोमःपृणतिदुग्धोअंशुः॥ ऋया

अ॰ दि॰ ५
५८

मसि त्वं इन्द्र्यात्य॒र्वाङ्॥ ११ ॥ अरं त सोमस्तनु वे भवाति॥ शतक्रतो मादयस्वा सुतेषु॥ मास्मां॑ अवपृतनासु प्रयुत्सु॥ इंद्राय सोमाः प्रदिवो विदानाः॥ ऋभुर्येभिर्वृषपर्वा विहायाः॥ प्रयुम्यमाणान्प्रति षू गृभाय॥ इंद्र पिब वृषधूतस्य वृष्णः॥ अहेडमान उपयाहि यज्ञं॥ तुभ्यं पवंत इंदवः सुतासः॥ गावो न वज्रिन्त्स्वमोको अच्छ॥ १२॥ इंद्रागहि प्रथमो यज्ञियानां॥ याते काकुत्सुकृता या वरिष्ठा॥ यया शश्वत्पिबसि मध्व ऊर्मिं॥ तया पाहि प्र ते अध्वर्युरस्थात्॥ संते वज्रो वर्ततामिंद्र गव्युः॥ प्रातर्युजा विबोधय॥ अश्विनावेह गच्छतं॥ अस्य सोमस्य पीतये॥ प्रातर्यावाणा प्रथमा यजध्वं॥ पुरा गृध्रादररुषः पिबाथः॥ प्रातर्हि यज्ञमश्विना दधाते॥ प्रशंसंति कवयः पूर्वभाजः॥ प्रातर्यजध्व

सां॰ कृ॰
५८

मश्विना हिनोत॥ न सायमस्ति देवया अजुष्टं॥ उतान्यो अस्मद्यजते वि चायः॥ पूर्वः पूर्वो यजमानो वनीयान्॥ १३॥ चाम्बुजि घाग च्छतं नो दाशं ना माभिश्री गैमेम स प्रथा भजामहे विशां तुया ह्यर्वाङ् उ छपिबायः षट्च॥ ३॥ नक्तं जातास्योषधे॥ रामे कृष्णे असिक्नि च॥ इदं रजनि रजय॥ किलासं पलितं च यत्॥ किलासं च पलितं च॥ निरितो नाशया पृषत्॥ आ त्वा स्वो विशतां वर्णः॥ परा शुक्लानि पातय॥ असितं ते निलयनं॥ आस्थानमसितं तव॥ ॥ १॥ असिक्नि यस्योषधे॥ निरितो नाशया पृषत्॥ अस्थिजस्य किलासस्य॥ तनूजस्य च यत्त्वचि॥ कृत्यया कृतस्य ब्रह्मणा॥ लक्ष्म श्वेतमनीनशं॥ सरूपा नाम ते माता॥ सरूपो नाम ते पिता॥ सरूपा स्योषधे सा॥ सरूप

भिदंकृधि॥३॥शुनंहुवेममघवानमिंद्रं॥अस्मिन्भरेनृतमंवाजसातौ॥शृ
ण्वंतमुग्रमूतयेसमत्सु॥घ्नंतंवृत्राणिसंजितंधनानां॥धूनुथद्यांपर्वतांदा
शुषेवसु॥निवोवनाजिहतेयामनोभिया॥कोपयथपृथिवींपृश्निमातरः॥
युधेयदुग्राःपृषतीरयुग्ध्वं॥प्रवेपयंतिपर्वतान्॥विविंचंतिवनस्पतीन्॥
॥३॥प्रोवारतमरुतोदुर्मदाइव॥देवासःसर्वयाविशा॥पुरुत्राहिसदृ
ङ्ङसि॥विशोविश्वाअनुप्रभु॥समत्सुत्वाहवामहे॥समत्स्वग्निमव
से॥वाजयंतोहवामहे॥वाजेषुचित्रराधसं॥संगच्छध्वंसंवध्वंसंवोमनांसिजानतां॥देवाभागंयथापूर्वे॥संजानानाउपासत॥स
मानोमंत्रःसमितिः॥४॥४॥समानी॥समानंमनःसहचित्तमेषां॥समा

नंकेतोअभिसंरभध्वं॥संज्ञानेनवोहविषायजामः॥समानीवआकूतिः॥
समानाहृदयानिवः॥समानमस्तुवोमनः॥यथावःसुसहासति॥५॥संज्ञा
नंनःस्वेभिः॥संज्ञानमरणेभिः॥संज्ञानमश्विनायुवं॥इहास्मासुनियच्छतं॥संज्ञा
नंमेबृहस्पतिः॥संज्ञानंसविताकरत्॥संज्ञानमश्विनायुवं॥इहमह्यंनि
यच्छतं॥उपच्छायामिवघृणेः॥अगन्मशर्मतेवयं॥६॥अग्नेहिरण्यसं
दृशः॥अदब्धेभिःसवितःपायुभिष्ट्वं॥शिवेभिरद्यपरिपाहिनोगयं॥हि
रण्यजिह्वःसुविताय नव्यसे॥रक्षामाकिर्नोअघशंसईशत॥मंदेमंदेहि
नोददुः॥यूथागवामृजुक्रतुः॥संगृभायपुरूशता॥उभयाहस्त्यावसु॥
शिशीहिरायआभर॥७॥शिप्रिन्वाजानांपते॥शचीवस्तवदंसना॥

ब्रा॰ द्वि॰ ४
५०

आतूनइंद्रभाजय ॥ गोषश्वेषुशुभ्रुषु ॥ सहस्रेषुतुवीमघ ॥ यद्देवादेवहेडनं ॥
देवासश्चकृमावयं ॥ आदित्यास्तस्मान्मामुंचत ॥ ऋतस्यर्तेन मुंचत ॥ ऋत
स्यर्तेनादित्याः ॥ ८ ॥ यजत्रामुंचतेह मा ॥ यन्तिर्वोयज्ञवाहसः ॥ आशिक्षंतो
नशेकिम ॥ मेदस्वतायजमानाः ॥ स्रुचाज्येन जुह्वतः ॥ अकामाववोविश्वेदे
वाः ॥ शिक्षंतोनोपशेकिम ॥ यद्दिवायदिनक्तं ॥ एनएनस्योकरत ॥ भूतं
मातस्माद्भव्यंच ॥ ९ ॥ द्रुपदादिवमुंचतु ॥ द्रुपदादिवेन्मुमुचानः ॥ स्विन्नःस्ना
स्नात्वीमलादिव ॥ पूतंपवित्रेणेवाज्यं ॥ विश्वेमुंचंतुमेनसः ॥ उद्वयंतमस
स्परि ॥ पश्यंतोज्योतिरुत्तरं ॥ देवंदेवत्रासूर्यं ॥ अगन्मज्योतिरुत्तमं ॥ १० ॥
तर्वरुधिवनस्पतींजानतामसतिवयंभरादित्याश्चनवच ॥ ५ ॥ वृषासो

सां॰ ब्रू
५०

नहविषापुनः । इंद्रआन्नाभ्यःपरि । सर्वाभ्योअभयंकरत ॥ १ ॥ जेताशत्रून्विचर्षणिः । आ
कूत्येत्वाकामोयत्वासमृधेत्वा । पुरोदधेअमृतत्वायजीवसे । आकूतिमस्यावसे । का
ममस्यसमृध्ये । इंद्रस्ययुंजतेधियः । आकूतिंदेवींमनसः पुरोदधे । यज्ञस्यमाताासु
हवामेअस्तु । यदिच्छामिमनसासकामः । विदेयमेनद्धृदयेनिविष्टं ॥ ॥ सेदग्नि
रग्नीं ॥ रत्येत्यन्यान् । यत्रवाजीतनयोवीडुपाणिः । सहस्रपाथाअक्षरासमेति । आ
शानांत्वाशापालेभ्यः । चतुर्भ्योअमृतेभ्यः । इदंभूतस्याध्यक्षेभ्यः । विधेमहविषाव
यं । विश्वाआशामधुनासंसृजामि । अनमीवाआपओषधयोभवंतु । अयंयज
मानोमृधोव्यस्यतां ॥ ३ ॥ अगृभीताःपशवःसंतुसर्वे । अग्निःसोमोवरुणोमित्र
इंद्रः । बृहस्पतिःसवितायःसहस्री । पूषानोगोभिरवसासरस्वती । त्वष्टारूपाणि
समनक्तुयज्ञैः । त्वष्टारूपाणिदधतीसरस्वती । पूषाभगंसवितानोददातु । बृहस्प

ऋ·द्वि·५ तिर्दर्दद्दिंद्रःसहस्रं।मित्रोदातावरुणःसोमोअग्निः।।७।।कृरन्निविष्टमस्पृतांनव

।।५१।। वा।।३।। ।।आनोभगमिंद्रद्युमंतं।नितेदेष्णस्यधीमहिप्ररेके।उर्वइवपप्र

थेकामोअस्मे।तमापृणावसुपतेवसूनां।इमंकाममंदयागोभिरश्वैः।चंद्रवतारा

धसापप्रथश्च।सुवर्यवोमतिभिस्तुभ्यंविप्राः।इंद्रायवाहःकुशिकासोअक्रन्।इंद्र

स्यनुवीर्याणिप्रवोचं।यानिचकारप्रथमानिवज्री।।१।।अहन्नहिमन्वपस्ततर्द।प्र

वक्षणाअभिनत्पर्वतानां।अहन्नहिंपर्वतेशिश्रियाणं।त्वष्टास्मैवज्रंस्वर्यंततक्ष।

वाश्राइवधेनवःस्यंदमानाः।अंजःसमुद्रमवजग्मुरापः।वृषायमाणोवृणीतसो

मं।त्रिकद्रुकेष्वपिबत्सुतस्य।आसायकंमघवादत्तवज्रं।अहन्नेनंप्रथमजामहीनां।

।।२।।यदिंद्राहन्प्रथमजामहीनां।आन्मायिनाममिनाःप्रोतमायाः।आत्सूर्यंज ।।५१।।

नयंद्यामुषासं।तादीत्नाशत्रुंनकिलाविवित्से।अहन्वृत्रंवृत्रतरंव्यंसं।इंद्रोवज्रे

गो

पामहतावधेन।स्कंधांसीवकुलिशेनाविवृक्णा।अहिःशयतउपपृक्पृथिव्याः।अ

योध्येवदुर्मदआहिजुह्वे।महावीरंतुविबाधमृजीषं।।३।।नातारीरस्यसमृतिंवधा

नां।संरुजानाःपिपिषइंद्रशत्रुः।विश्वोविहायाअरतिः।वसुर्दधेहस्तेदक्षिणे।

तरणिर्नशिश्रथत्।श्रवस्ययानशिश्रथत्।विश्वस्माइतिषुध्यसेदेवत्राहव्यमूहि

षे।विश्वस्माइत्सुकृतेवारमण्वति।अग्निर्द्वाराव्यृण्वति।।४।।उदुग्निर्हनोअभिका दि

ममीरयन्।प्रपृंचन्विश्वाभुवनानिपूर्वथा।आकेतुनासुषमिद्धोयजिष्ठः।कामन्नोअ

ग्नेअभिहर्यदिग्भ्यः।जुषाणोहव्यममृतेषुदूढ्यः।आनोरयिंबहुलांगोमतीमिषं।

निधेहियक्षदमृतेषुभूषन्।अश्विनायज्ञमागतं।दाश्वुषःपुरुदंससा।पूषारक्ष

तुनोरयिं।।५।।इमंयज्ञमश्विनावर्धयंता।इमौरयिंयजमानायधत्तं।इमौपशून्र

क्षतांविश्वतोनः।पूषानःपातुसदमप्रयुच्छन्।प्रतेमहेसरस्वति।सुभगेवाजिनी

अ॰ द्वि॰ ५

॥५२॥

वति। स सुवाचेमसरे मतिं। इदं ते हव्यं घृतवत्सरस्वति। सत्यवाचे प्रभरेमा हवींषि। इमा
नि ते दुरिता सौभगानि। तेभिर्वयं सुभगासः स्याम॥ ५॥ वाजयन्ती नो मजीषं स्वपवति
रक्षतु नो रयिं सौभगान्येकं च॥ ६॥ ॥ यज्ञो राज्ञो यज्ञ ईड्यो वसूनां। यज्ञः सस्या
नो घृतसुक्षितीनां। यज्ञ इष्टः पूर्वचित्तिं दधातु। यज्ञो अस्मण्वाः अप्येतु देवान्। अयं य
ज्ञो वर्धतां गोभिरश्वैः। इयं वेदिः स्वपत्या सुवीरा। इदं बर्हिरति बर्हींष्यन्या। इमं यज्ञं
विश्वे अवंतु देवाः। भग एव भगवां अस्तु देवाः। तेन वयं भगवंतः स्याम॥ १॥ तं त्वा भग
सर्व इज्जोहवीमि। स नो भग पुर एता भवेह। भग प्रणेतर्भग सत्यराधः। भगेमां धियमु
दवद्दनः। भग प्र णो जनय गोभिरश्वैः। भग प्र नृभिर्नृवंतः स्याम। शाश्वतीः समा उ
पयंति लोकाः। शाश्वतीः समा उपयंत्यायः। इष्टं पूर्तं शाश्वतीनां समानां शाश्वते ॥५३॥
न। हविषेष्टानं तं लोकं परमारुरोह॥ २॥ इयमेव सा या प्रथमा व्योहत। सारुणि कुरु पा—

तेपंचदेवी। द्वे स्वसारौ वयतस्तंत्रमेतत्। सनातनं विततं षण्मयूखं। अवान्याः स्तं
तून्किरतो धत्तो अन्यान्। नावपृज्याते नगमाते अंतं। आ वो यंतूदवाहासो अद्य।
वृष्टिं ये विश्वे मरुतो जुनंति। अयं यो अग्निर्मरुतः समिद्धः। एतं जुषध्वं कवयो युवा
नः॥ ३॥ धारावरा मरुतो धृष्ण्वोजसः। मृगा न भीमास्तविषेभिरूर्मिभिः। अग्नयो
न शुशुचाना ऋजीषिणः। भृमिं धमंत उपगा अवृण्वत। विचक्रमे त्रिर्देवः। आ वेध
सं नीलपृष्ठं बृहंतं। बृहस्पतिं सदने सादयध्वं। सादद्योनिं दम आदीदिवांसं।
हिरण्यवर्णमरुषं सपेम। स हि शुचिः शतपत्रः स शुंध्युः॥ ४॥ हिरण्यवाशी रि
षिरः सुवर्षाः। बृहस्पतिः सख्या वेशाक्रुषाः। पुरू सखिभ्य आसुतिं करिष्ठः। पूषं
स्तव व्रते वयं। न रिष्येम कदाचन। स्तोतारस्त इह स्मसि। यास्ते पूषन्नावो अंतः स
मुद्रे। हिरण्ययीरंतरिक्षे चरंति। याभिर्यासि दूत्यां सूर्यस्य। कामेन कृतश्रव इच्छ

द

द्वि॰ ब्रा॰ ५ मीनः॥ ५॥ अरण्यान्यरण्यान्यसौ। या प्रेव नश्यसि। कथा ग्रामं न पृच्छसि। न त्वा भी
रिव विंदती ३ँ। वृषारवाय वदते। यदुपावति चिच्चिकः। आघाटिभिरिव धावयन्
॥ ५३॥ अरण्यानिर्महीयते। उत गाव इवादन्नुत वेश्मेव दृश्यते॥ ३॥ उतो अरण्यानिः
सायं। शकटीरिव सर्जति। गामंगैष आ ह्वयति। दार्वंगैष उपावधीत्। वसन्नर
ण्यान्याः सायं। अक्रुक्षदिति मन्यते। न वा अरण्यानिर्हंति। अन्यश्चेन्नाभिगच्छ
ति। स्वादोः फलस्य जग्ध्वा। यथा कामं निपद्यते। आंजनगंधिं सुरभीं। बह्वन्ना
मकृषीवलां। प्राहं मृगाणां मातरं। अरण्यानीमशंसिषं॥ ७॥ स्याम रुरोह
युवानः शुं ध्यूरिव मानो दृश्यते निपद्यत्वे त्वारिव॥ ८॥ ॥ वार्त्रहत्याय
शवसे। पृतनासाह्याय च। इंद्र त्वा वर्तयामसि। सुब्रह्माणं वीरवंतं बृहंतं। उरुं ॥ ५३॥
गभीरं पृथुबुध्नमिंद्र। श्रुतर्षिमुग्रमभिमातिषाहं। अस्मभ्यं चित्रं वृषणं रयिं दाः॥

बृहस्प

क्षेत्रियै त्वा निर्ऋत्यै त्वा। द्रुहो मुंचामि पाशात्। अनागसं ब्रह्मणे त्वा करोमि॥ १॥
शिवे ते द्यावापृथिवी उभे इमे। शं ते अग्निः सहाद्भिरस्तु। शं द्यावापृथिवी सहौषधी
भिः। शमंतरिक्षं सह वातेन ते। शं ते चतस्रः प्रदिशो भवंतु। या दैवीश्चतस्रः प्रदि
शः। वातपत्नीरभि सूर्यो विचष्टे। तासां त्वा जरस आदधामि। प्र यक्ष्म एतु निर्ऋतिं
पराचैः। अमो चि यक्ष्मा दुरितादवर्त्यै॥ २॥ द्रुहः पाशान्निर्ऋत्यै चोदमोचि। अहा अ वर्तिमि
विदत्स्योनं। अप्यभूद्भद्रे सुकृतस्य लोके। सूर्यमृतं तमसो ग्राह्या यत्। देवा अमुंच
न्नसृजन्व्येनसः। एवमहमिमं क्षेत्रियाज्जामिशंसात्। द्रुहो मुंचामि वरुणस्य पा
शात्। बृहस्पते युवमिंद्रश्च वस्वः। दिव्यस्येशाथे उत पार्थिवस्य। धत्तं रयिं स्तुवते
द्वि॰ २ कीरये त्त॥ ३॥ यूयं पात स्वस्तिभिः सदा नः। देवायुधमिंद्रमाजोहुवानाः। विश्वापृथ
मभियेर क्षमाणाः। येन हता दीर्घमध्वानमायन्। अनंतमर्थमानिवर्त्स्यमानाः। य

श्री॰द्वि॰ त्ते सुजाते हिमवत्सु भेषजं। मयोभूः शंतमा यद्वदो सि। ततो नो देहि सीबले। अद्दो गि
॥५४॥ रिभ्यो अधि यत् सुधावसि। सं शोभमाना कन्येव शुभ्रे ॥४॥ तां त्वा मुद्गला हविषा वर्ध
यंति सा नः सीबले रयिमाभाजयेह। पूर्वे देवा अपरेणानुपश्यं जन्मभिः। जन्मान्य
वैरेः परांसि। वेदानि देवा अयमस्मीति मां। अहं हित्वा शरीरं जरसः परस्तात्। प्रा
णापानौ चक्षुः श्रोत्रं। वाचं मनसि संभृतौ। हित्वा शरीरं जरसः परस्तात्। आभूतिं
भूतिं वयमश्नवामहे। इमा एव ता उषसो याः प्रथमा व्यो छन्। ता देव्यः कुर्वते पंच रूपा। श
श्वतीर्नावपृज्यंति। न गमंत्यंतं॥५॥ करोम्यवत्यै विधुत्रेश्नवामहे त्वा रिच॥६॥
॥ वसूनां त्वाधीतेन। रुद्राणामूर्म्या। आदित्यानां तेजसा। विश्वेषां देवानां क्रतुना।
मरुतामेम्ना जुहोमि स्वाहा। अभिभूतिरहमागमं। इंद्रसखा स्वायुधः। आस्वाशा
सु दुःषहः। इदं वर्चो अग्निना दत्तमागात्। यशो भर्गः सह ओजो बलं च॥१॥ दीर्घा ॥५८॥

युत्वाय शतशारदाय। प्रतिगृभ्णामि महते वीर्याय। आयुरसि विश्वायुरसि। स
र्वायुरसि सर्वमायुरसि। सर्वं म आयुर्भूयात्। सर्वमायुर्गेषं। भूर्भुवः सुवः। अग्निर्ध
र्मेणान्नादः। मृत्युर्धर्मेणान्नपतिः। ब्रह्म क्षत्रं स्वाहा॥२॥ प्रजापतिः प्रणेता। बृ
हस्पतिः पुरएता। यमः पंथाः। चंद्रमाः पुनरसुः स्वाहा। अग्निरन्नादोन्नपतिः। अ
न्नाद्यमस्मिन्यज्ञे यजमानाय ददातु स्वाहा। सोमो राजा राजपतिः। राज्यमस्मिन्य
ज्ञे यजमानाय ददातु स्वाहा। वरुणः सम्राट् सम्राट्पतिः। साम्राज्यमस्मिन्यज्ञे
यजमानाय ददातु स्वाहा॥३॥ मित्रः क्षत्रं क्षत्रपतिः। क्षत्रमस्मिन्यज्ञे यजमाना
य ददातु स्वाहा। इंद्रो बलं बलपतिः। बलमस्मिन्यज्ञे यजमानाय ददातु स्वाहा। बृह
ई स्प स्पतिर्ब्रह्म ब्रह्मपतिः। ब्रह्मास्मिन्यज्ञे यजमानाय ददातु स्वाहा। सविता राष्ट्रं राष्ट्रप
तिः। राष्ट्रमस्मिन्यज्ञे यजमानाय ददातु स्वाहा। पूषा विशां विट्पतिः। विशमस्मिं

न्यज्ञेयजमानायददातुस्वाहा। सरस्वतीपुष्टिःपुष्टिपत्नी। पुष्टिमस्मिन्यज्ञेयजमाना
यददातुस्वाहा। त्वष्टापशूनांमिथुनानांरूपकृद्रूपपतिः। रूपेणास्मिन्यज्ञेयजमानाय
पशून्दधातुस्वाहा॥४॥ वस्वाहासाम्राज्यमस्मिन्यज्ञेयजमानायददातुस्वाहाविश्व
मास्मिन्यज्ञेयजमानायददातुस्वाहावत्वारिव॥७॥ ॥सईंपाहियऋजीषी
तरुत्रः। यःशिप्रवान्वृषभोयोमतीनां। योगोत्रभिद्वज्रभृद्योहरिष्ठाः। सइंद्रचित्राँ

अभितृंधिवाजान्। आतेशुष्मोवृषभएतुपश्चात्। आोत्तरादधरागापुरस्तात्। आ
विश्वतोअभिसमेत्वर्वाङ्। इंद्रद्युम्नंस्वर्वद्धेह्यस्मे। प्रोष्वस्मैपुरोरथं। इंद्राय
शूषमर्चत॥१॥ अभीकेचिदुलोककृत्। संगेसमत्सुवृत्रहा। अस्माकंबोधिचो
दिता। नभंतामन्यकेषां। ज्याकाअधिधन्वसु। इंद्रंवयंशुनासीरं। अस्मिन्य
ज्ञेहवामहे। आवाजेरुपनोगमत्। इंद्रायशुनासीराय। स्रुचाजुहुतनोहविः॥२॥

जुषतांप्रतिमेधिरः। प्रहव्यानिघृतवंत्यस्मै। हर्यश्वायभरतासजोषाः। इंद्रर्तुभिर्ब्रह्म
णावावृधानः। शुनासीरीहविरिदंजुषस्व। वयःसुपर्णाउपसेदुरिंद्रं। प्रियमेधाऋष
योनाधमानाः। अपध्वांतमूर्णुहिपूर्धिचक्षुः। मुमुग्ध्यस्मान्निधयेवबधान्। बृह
दिंद्रायगायत॥३॥ मरुतोवृत्रहंतमं। येनज्योतिरजनयन्नृतावृधः। देवंदेवायजागृ
वि। कामिहेकाःकद्रूमेपतंगाः। मांथालाःकुलिपरिमापतंति। अनावृतैनानभिधमंतुदे
वाः। सौपर्णंचक्षुस्तनुवाविदेय। एवावेदस्यवरुणस्यहंतो। नमस्याधीरमृतस्यगो
पां। सनःशर्मत्रिवरूथंवियंसत्॥४॥ यूयंपातस्वस्तिभिःसदानः। नाकेसुपर्णमु
पयत्पतंतं। हृदावेनंतोअभ्यचक्षतत्वा। हिरण्यपक्षंवरुणस्यदूतं। यमस्ययोनौ
शकुनंभुरण्युं। शंनोदेवीरभिष्टये। आपोभवंतुपीतये। शंयो
रभिस्रवंतुनः। ईशानावार्याणां। क्षयंतीश्चर्षणीनां॥५॥ अपोयाचामिभेषजं।

ब्रा॰ द्वि॰ ५ ॥५६॥

अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा। अग्निं च विश्वशंभुवं। आपश्च विश्वभेषजीः। यद् प्रू ते सरस्वति। गोष्वश्वेषु यन्मधु। तेन मे वाजिनीवति। मुखमङ्धि सरस्वति। या सरस्वती वेशंभल्या॥ ६॥ तस्यां मे रास्व। तस्यास्ते भक्षीय। तस्यास्ते भूयिष्ठभाजो भूयास्म। अहं त्वदस्मि मदसि त्वमेतत्। ममासि योनिस्तव योनिरस्मि। ममैव सन्वह हव्यान्यग्ने। पुत्रः पित्रे लोककृज्जातवेदः। इहैव संतत्र संतत्वाग्ने। प्राणेन वाचा मनसा बिभर्मि। तिरो मा संतमायुर्मा प्रहासीत्। ज्योतिषा त्वा वैश्वानरेणोपतिष्ठे। अयं ते योनिर्ऋत्वियः। यतो जातो अरोचथाः। तं जानन्नग्न आरोह। अथा नो वर्धया रयिं। या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानं। अच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि। यज्ञो भूत्वा यज्ञमासीद स्वां योनिं। जा ॥५७॥ तवेदो भुव आ जायमानः सक्षय एहि। उपावरोह जातवेदः पुनस्त्वं॥ ८॥ देवेभ्यो

हव्यं वह नः प्रजानन्। आयुः प्रजां रयिमस्मासु धेहि। अजस्रो दीदिहि नो दुरोणे। तमिन्द्रं जोहवीमि मघवानमुग्रं। सत्रा दधानमप्रतिष्कुतं शवांसि। मंहिष्ठो गीर्भिरा च यज्ञियो ववर्तत्। राये नो विश्वा सुपथा कृणोतु वज्री। त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्। सोमम पिबद्विष्णुना सुतं यथावशात्। स ईं ममाद महि कर्म कर्तवे महामुरुं॥ ९॥ सैनं सश्चद्देवो देवः सत्यमिन्दुः सत्य इन्द्रः। विदद्यती सरमा रुग्णमद्रेः। महि पाथः पूर्व्यं सध्र्यक्कः। अग्रं नयत्सुपद्यक्षराणां। अच्छा रवं प्रथमा जानती गात्। विदद्गव्यं सरमा दृढमूर्वं। येना नु कं मानुषी भोजते विट्। आ ये विश्वाः स्वपत्यानि चक्रुः। कृण्वानासो अमृतत्वाय गातुं। त्वं नृभिर्नृपते देववहूतौ॥ १०॥ भूरीणि वृत्रा हर्यश्व हंसि। त्वं नि दस्युं चुमुरिं। धुनिं चास्वा

यो॰ २

ब्रा॰द्वि॰५

॥५७॥

पयोदमीतयेसुहंतु। एवापाहिप्रत्नथामंदतुत्वा। श्रुधिब्रह्मवावृधस्वोतगीर्भिः। आविःसूर्यंकृणुहिपीपिहीषः। जहिशत्रूंरभिगाइंद्रतंधि। अग्नेबाधस्वविमृधोनुदस्व। अपामीवाअपरक्षांसिसेध। अस्मात्समुद्राद्बृहतोदिवोनः॥११॥ अपांप्रमानमुपनःसृजेह। यज्ञप्रातितिष्ठसुमतौसुशेवा। आत्वा। वसूनिपुरुधाविशंतु। दीर्घमायुर्यजमानायकृण्वन्। अधामृतेनजरितारमंग्धि। इंद्रःश्रुनावद्वितनोतिसीरां। संवत्सरस्यप्रतिमाणमेतत्। अर्कस्यज्योतिस्तदिदासज्येष्ठं। संवत्सरंःश्रुनवत्सीरमेतत्। इंद्रस्यराधःप्रयतंपुरुत्मना। तदर्करूपंविममानमेति। द्वादशारोप्रतितिष्ठतीद्वृषा। अश्वायंतोगव्यंतोवाजयंतः। हवामहेत्वोपगंतवाउ। आभूषंतस्त्वासुमतौनवायां। वयमिंद्रत्वाश्रुनंहुवेम॥१२॥ अर्वंतहविर्गीयतयंःसत्व

॥५७॥

विश्व

हरिःओम्॥ प्राणोरक्षतिमेजनत्॥ इयोभूत्वाबहुधाबहूनि॥ सइत्सर्वंव्यानशे॥ योदेवोदेवेषुविभूरंतः॥ आवृद्दूदाक्षेत्रियध्वगद्वषो॥ तमित्प्राणंमनसोपशिक्षत॥ अग्रंदेवानामिदमत्तुनोहविः॥ मनसश्चित्तेदं॥ भूतंभव्यंचगुप्यते॥ तद्धिदेवेष्वग्रियं॥१॥ आनएतुपुरश्चरं॥ सहदेवैरिमंहवं॥ मनःश्रेयसिश्रेयसि॥ कर्मन्यज्ञपतिंदधत्॥ जुषतांमेवागिदंहविः॥ विराड्देवीपुरोहिता॥ हव्यवाडनपायिनी॥ ययारूपाणिबहुधावदंति॥ पेशांसिदेवाःपरमेजनित्रे॥ सानोविराडनपस्फुरंती॥५॥ वाग्देवीजुषतामिदं

हविः॥ चक्षुर्देवानां ज्योतिरमृतेन्यक्तं॥ अस्य विज्ञानाय बहुधा
निधीयते॥ तस्य सुम्नमशीमहि॥ मा नो हासीद्विचक्षणं॥ आयु
रिन्नः प्रतीर्यतां॥ अनंधाश्चक्षुषा वयं॥ जीवा ज्योतिरशीमहि॥
सुवर्ज्योतिरुतामृतं॥ श्रोत्रेण भद्रमुत शृण्वंति सत्यं॥ श्रोत्रेण
वाचं बहुधोद्यमानां॥ श्रोत्रेण मोदश्च महश्च श्रूयते॥ श्रोत्रेण स
र्वा दिश आ शृणोमि॥ येन प्राच्या उत दक्षिणा॥ प्रतीच्यै दिशः
शृण्वंत्युत्तरात्॥ तदिच्छ्रोत्रं बहुधोद्यमानं॥ अरान्न नेमिः परि स
र्वं बभूव॥ ३॥ अग्निर्यमनपस्फुरंती सत्यं सप्त च॥ १॥

उदेहि वाजिन्यो अप्स्वन्तः॥ इदं राष्ट्रमाविश सूनृतावत्॥ यो रो
हितो विश्वमिदं जजान॥ स नो राष्ट्रेषु सुधितां दधातु॥ रोह रोह सु २
रोहित आरुरोह॥ प्रजाभिर्वृद्धिं जनुषामुपस्थं॥ ताभिः संरब्धो
अविदत्षडुर्वीः॥ गातुं प्रपश्यन्निह राष्ट्रमाहाः॥ आहार्षीद्राष्ट्र
मिह रोहितः॥ मृधो व्यास्थदभयं नो अस्तु॥ १॥ अस्मभ्यं द्यावा
पृथिवी शक्करीभिः॥ राष्ट्रं दुहाथामिह रेवतीभिः॥ विमिमर्शो
रोहितो विश्वरूपः॥ समाचक्राणः प्ररुहो रुहश्च॥ दिवं गत्वा
य महता महिम्ना॥ विनो राष्ट्रमुनक्तु पयसा स्वेन॥ यास्ते वि

ब्रां०स०द्वि

६०

ण

ता

ऋस्तपसा संबभूवुः॥ गायत्रं वसवस्ता आगुः॥ ता स्वा विश्वा तुम
हसा स्वेन॥ संमाता पुत्रो अभ्येतु रोहितः॥२॥ यूयमुग्रा मरुतः
पृश्निमातरः॥ इंद्रेण सयुजा प्रमृणीथ शत्रून्॥ आ वो रोहितो अ
शृणोदभिद्यवः॥ त्रिसप्तासो मरुतः स्वादुसंमुदः॥ रोहितो द्या
वापृथिवी जजान॥ तस्मिंस्तंतुं परमेष्ठी ततान॥ तस्मिं
श्रिये अज एकपात्॥ अदृंहद्द्यावापृथिवी बलेन॥ रोहि
तो द्यावापृथिवी अदृंहत्॥ तेन सुवः स्तभितं तेन नाकः॥३॥
सोंऽतरिक्षं रजसो विमानः॥ तेन देवाः सुवरन्वविंदन्॥ सुप्री

६१

धुपिन्वमाना। शुद्रापात्राणि सुदुघा न धेनुः। श्येनस्य पत्रं न प्लीहा शचीभिः। आसंदी
नाभिरुदरं न माता। कुंभो वनिष्ठुर्जनिता शचीभिः। यस्मिन्नग्रे योन्यां गर्भो अंतः॥३॥
प्लाशीर्व्यक्तः शतधार उत्सः। दुहे न कुंभीं स्वधां पितृभ्यः। मुखं सदस्य शिर इत्सदे
न। जिह्वा पवित्रमश्विना सं सरस्वती। चप्यं न पायुर्भिषगस्य वालः। वस्तिर्न शेपो
हरसा तरस्वी। अश्विभ्यां चक्षुरमृतं ग्रहाभ्यां। छागेन तेजो हविषा शृतेन। पक्ष्माणि
गोधूमैः कुवलै रुतानि। पेशो न शुक्लमसितं वसाते॥४॥ अविर्न मेषो नसि वीर्याय। प्रा
णस्य पंथा अमृतो ग्रहाभ्यां। सरस्वत्युपवाकैर्व्यानं। नस्यानि बर्हिर्बदरैर्जजान। इंद्र
स्य रूपमृषभो बलाय। कर्णाभ्यां श्रोत्रममृतं ग्रहाभ्यां। यवा न बर्हिर्भ्रुवि केसराणि।
कर्कंधु जज्ञे मधु सारघं मुखात्। आत्मन्नुपस्थे न वृकस्य लोम। मुखे श्मश्रूणि न व्याघ्र
लोम॥५॥ केशा न शीर्षन्यशसे श्रियै शिखा। सिंहस्य लोम त्विषिरिंद्रियाणि। अ

श्रा.द्वि.६

॥६१॥

गोन्यात्मन्भिषजात दश्विना। आत्मानमंगैः समधात्सरस्वती। इंद्ररूपं शतमानमा
युः। चंद्रेण ज्योतिरमृतं दधाना। सरस्वती योन्यांगर्भमंतः। अश्विभ्यांपत्नीसुकृतं बि
भर्त्ति। अपां रसेन वरुणो न साम्ना। इंद्रं श्रियैजनयन्नप्सुराजा। तेजः पशूनां
हविरिंद्रियावत्। परिस्रुता पयसा सारघं मधु। अश्विभ्यां दुग्धं भिषजा सरस्व
त्या सुतासुताभ्यां। अमृतः सोम इंदुः॥९५॥ अंतरश्चारादंतर्वसाव्याघ्रलोमं राजा ते
चत्वारिच॥४॥ ॥ मित्रोसि वरुणोसि। समहं विश्वैर्देवैः। क्षत्रस्य नाभिर
सि। क्षत्रस्य योनिरसि। स्योनामासीद। सुषदामासीद। मा त्वा हिंसीत्। मा मा
हिंसीत्। निषसाद धृतव्रतो वरुणः। पस्त्यास्वा॥१॥ साम्राज्याय सुक्रतुः। देव
स्य त्वा सवितुः प्रसवे। अश्विनोर्बाहुभ्यां। पूष्णो हस्ताभ्यां। अश्विनोर्भैषज्येन। तेज ॥६१॥
से ब्रह्मवर्चसायाभिषिंचामि। देवस्य त्वा सवितुः प्रसवे। अश्विनोर्बाहुभ्यां। पूष्णो ह

स्ताभ्यां। सरस्वत्यै भैषज्येन॥२॥ वीर्यायान्नाद्यायाभिषिंचामि। देवस्य त्वा सवितुः
प्रसवे। अश्विनोर्बाहुभ्यां। पूष्णो हस्ताभ्यां। इंद्रस्येंद्रियेण। श्रियै यशसे बलायाभि
षिंचामि। कोसि कतमोसि। कस्मै त्वा काय त्वा। सुश्लोका ३ सुमंगला ३ सत्यरा
जा ३ न्॥ शिरो मे श्रीः॥३॥ यशो मुखं। त्विषिः केशाश्च श्मश्रूणि। राजा मे प्राणो अमृ
तं। सम्राट् चक्षुः। विराट् श्रोत्रं। जिह्वा मे भद्रं। वाङ्महः। मनो मन्युः। स्वराड् भामः। मो
दाः प्रमोदा अंगुलीरंगानि॥४॥ चित्तं मे सहः। बाहू मे बलमिंद्रियं। हस्तौ मे कर्म वीर्यं।
आत्मा क्षत्रमुरो मम। पृष्ठीर्मे राष्ट्रमुदरमंसौ। ग्रीवाश्च श्रोण्यौ। ऊरू अरत्नी जानु
नी। विशो मेंगानि सर्वतः। नाभिर्मे चित्तं विज्ञानं। पायुर्मे पचितिर्भसत्॥५॥ आनं
दनंदावांडौ मे। भगः सौभाग्यं पसः। जंघाभ्यां पद्भ्यां धर्मोस्मि। विशि राजा प्रतिष्ठि
तः। प्रतिक्षत्रे प्रतितिष्ठामि राष्ट्रे। प्रत्यश्वेषु प्रतितिष्ठामि गोषु। प्रत्यंगेषु प्रतितिष्ठा

ब्रा·द्वि·६ स्यात्मन्। प्रतिप्राणेषु प्रतितिष्ठामि पुष्टे। प्रति द्यावापृथिव्योः। प्रतितिष्ठामि यज्ञे॥ ६॥ मि-

॥ ६१॥ त्रयादेवा एकादश। त्रयस्त्रिꣳशाः सुराधसः। बृहस्पति पुरोहिताः। देवस्य सवितुः

सवे। देवा देवैरवंतु मा। प्रथमा द्वितीयैः। द्वितीयास्तृतीयैः। तृतीयाः सत्येन। स-

त्यं यज्ञेन। यज्ञो यजुर्भिः॥ ७॥ यजूꣳषि सामभिः। सामान्यृग्भिः। ऋचो याज्याभिः।

याज्या वषट्कारैः। वषट्कारा आहुतिभिः। आहुतयो मे कामान्त्समर्धयंतु। भूः स्वा-

हा। लोमानि प्रयतिर्मम। त्वङ्म आनतिरागतिः। माꣳसं म उपनतिः। वस्वस्थि। म-

ज्जा म आनतिः॥ ८॥ पस्त्या स्वासर स्वत्येभिषज्येनश्री रंगानि सस यज्ञेयज्ञो व

मे यजुर्भिरुपनतिर्हवं॥ ९॥ ॥ यद्देवा देवहेडनं। देवासश्चकृमा वयं।

अग्निर्मा तस्मादेनसः। विश्वान्मुंचत्वꣳहसः। यदि दिवा यदि नक्तं। एनाꣳसि चकृमा ॥ ६१॥

वयं। वायुर्मा तस्मादेनसः। विश्वान्मुंचत्वꣳहसः। यदि जाग्रद्यदि स्वप्ने। एनाꣳसि

चकृमा वयं॥ १॥ सूर्यो मा तस्मादेनसः। विश्वान्मुंचत्वꣳहसः। यद्ग्रामे यदरण्ये। यत्स-

भायां यदिंद्रिये। यच्छूद्रे यदर्ये। एनश्चकृमा वयं। यदेकस्याधि धर्मणि। तस्यावय-

जनमसि। यदापो अघ्निया वरुणेति शपामहे। ततो वरुण नो मुंच॥ २॥ अवभृथ नि-

निचंकुण चंकुण निचेरुरसि। अव देवैर्देवकृतमेनोयाट्। अव मर्त्यैर्मर्त्यकृतं। उरोरा नो देव रि-

षस्पाहि। सुमित्रा न आप ओषधयः संतु। दुर्मित्रास्तस्मै भूयासुः। योस्मान्द्वेष्टि।

मु यं च वयं द्विष्मः। द्रुपदादिवेन्मुमुचानः। स्विन्नः स्नातीमलादिव॥ ३॥ पूतं पवित्रेणेवा-

ज्यं। आपः शुंधंतु मैनसः। उद्वयं तमसस्परि। पश्यंतो ज्योतिरुत्तरं। देवं देवत्रा सूर्यं।

अगन्म ज्योतिरुत्तमं। प्रतियुतो वरुणस्य पाशः। प्रत्यस्तो वरुणस्य पाशः। एधोस्येधि-

षीमहि। समिदसि॥ ४॥ तेजोसि तेजो मयि धेहि। अपो अन्वचारिषं। रसेन समसृ-

क्ष्महि। पयस्वाꣳ अग्न आगमं। तं मा सꣳसृज वर्चसा। प्रजया च धनेन च। सं मा व

व्रा॰ द्वि॰ ६ वर्त्ति पृथिवी। समुषाः। समु सूर्यः। समु विश्वमिदं जगत्। वैश्वानरज्योतिर्भूयासं। वि
भुं कामं व्यश्नवै। भूः स्वाहा॥ ५॥ स्वप्नएनांसि चकृमा वयं मुंचमला द्विषसामिंदसिंज मि-
॥ ६२॥ गन्त्री णिव॥ ६॥ ॥ होतायक्षत्समिधेंद्रमिडस्पदे। नाभा पृथिव्या अधि। दिवोव
र्ष्मन्त्समिध्यते। ओजिष्ठश्चर्षणीसहान्। वेत्वाज्यस्य होतर्यज। होतायक्षत्तनूनपातं।
ऊतिभिर्जेतारमपराजितं। इंद्रं देवं स्वर्विदं। पथिभिर्मधुमत्तमैः। नराशंसेन ते
जसा॥ १॥ वेत्वाज्यस्य होतर्यज। होतायक्षदिडाभिरिंद्रमीडितं। आजुह्वानममर्त्यं।
देवो देवैः सवीर्यः। वज्रहस्तः पुरंदरः। वेत्वाज्यस्य होतर्यज। होतायक्षद्बर्हिषींद्रं नि
र षद्वरं। वृषभं नर्यापसं। वसुभी रुद्रैरादित्यैः। सयुग्भिर्बर्हिरासदत्॥ २॥ वेत्वाज्यस्य
होतर्यज। होतायक्षदोजो न वीर्यं। सहो द्वार इंद्रमवर्धयन्। सुप्रायणा विश्रयंता ॥ ६२॥
मृतावृधः। द्वार इंद्राय मीढुषे। वियंत्वाज्यस्य होतर्यज। होतायक्षदुषे इंद्रस्य धेनू।

सुदुघे मातरौ मही। सवातरौ न तेजसी। वत्समिंद्रमवर्धतां॥ ३॥ वीतामाज्यस्य होतर्यज।
होतायक्षद्दैव्या होतारा। भिषजा सखाया। हविषेंद्रं भिषज्यतः। कवी देवौ प्रचेतसौ। इं
द्राय धत्त इंद्रियं। वीतामाज्यस्य होतर्यज। होतायक्षत्तिस्रो देवीः। त्रयस्त्रिधातवोप
सः। इडा सरस्वती भारती॥ ४॥ महींद्रपत्नीर्हविष्मतीः। वियंत्वाज्यस्य होतर्यज।
होतायक्षत्त्वष्टारमिंद्रं देवं। भिषजं सुयजं घृतश्रियं। पुरुरूपं सुरेतसं मघोनिं। इं
द्राय त्वष्टा दधदिंद्रियाणि। वेत्वाज्यस्य होतर्यज। होतायक्षद्वनस्पतिं। शमितारं
शतक्रतुं। धियो जोष्टारमिंद्रियं॥ ५॥ मध्वा समंजन्पथिभिः सुगेभिः। स्वदाति ह
व्यं मधुना घृतेन। वेत्वाज्यस्य होतर्यज। होतायक्षदिंद्रं स्वाहाज्यस्य। स्वाहा मेद
सः। स्वाहा स्तोकानां। स्वाहा स्वाहाकृतीनां। स्वाहा हव्यसूक्तीनां। स्वाहा देवा आ
ज्यपान्। स्वाहेंद्रं होत्राज्जुषाणाः। इंद्र आज्यस्य वियंतु। होतर्यज॥ ६॥ तेजसा

श्री॰ द्वि॰ ६ ॥६३॥

सदद्वर्धतां भारतीं द्रियं जुषाणा देव॥७॥ ॥समिधेंद्र तनूनपात मिउासि बर्हिर्व्या
जउषे देव्या स्तिस्त्रस्त्वष्टारं वनस्पतिमिंद्रं॥ ॥चतुर्वैल्वेको वियंतु द्विर्वश्तामेको वियं
तु द्विर्वैल्वेको वियंतु॥ ॥समिद्ध इंद्र उषसामनीके पुरोरुचा पूर्वकृद्वावृधानः। त्रि
भिर्देवैस्त्रिंशता वज्रबाहुः। जघान वृत्रं विदुरो ववार। नराशंसः प्रति शूरो मिमा
नः। तनूनपात्प्रति यज्ञस्य धाम। गोभिर्वपावान्मधुना समंजन्। हिरण्यैश्चंद्री यजति
प्रचेताः। ईडितो देवैर्हरिवाँ अभिष्टिः। आजुह्वानो हविषा वर्धमानः॥१॥ पुरंदरो
मघवान्वज्रबाहुः। आयातु यज्ञमुप नो जुषाणः। जुषाणो बर्हिर्हरिवान्न इंद्रः।
प्राचीनं सीदत्प्रदिशा पृथिव्याः। उरुव्यचाः प्रथमानं स्योनं। आदित्यैरक्तं वसु
भिः सजोषाः। इंद्रं दुरः कवष्यो धावमानाः। वृषाणं यंतु जनयः सुपत्नीः। द्वारो दे ॥६४॥
वीरभितो विश्रयंतां। सुवीरा वीरं प्रथमाना महोभिः॥२॥ उषासानक्ता बृहती बृ

हंतं। पयस्वती सुदुघे शूरमिंद्रं। पेशस्वती तंतुना संव्ययंती। देवानां देवं यजतः सुरुक्मे।
दैव्या मिमाना मनसा पुरुत्रा। होतारा विंद्रं प्रथमा सुवाचा। मूर्धन्यज्ञस्य मधुना दधाना।
प्राचीनं ज्योतिर्हविषा वृधातः। तिस्रो देवीर्हविषा वर्धमानाः। इंद्रं जुषाणा वृषणं न प
त्नीः॥३॥ अच्छिन्नं तंतुं पयसा सरस्वती। इडा देवी भारती विश्वतूर्तिः। त्वष्टा दधदिंद्रा
य शुष्मं। अपाको चिष्टुर्यशसे पुरूणि। वृषा यजन्वृषणं भूरिरेताः। मूर्धन्यज्ञस्य सम
नक्तु देवान्। वनस्पतिरवसृष्टो न पाशैः। त्मन्या समंजञ्छमिता न देवः। इंद्रस्य हव्यैर्जठ
रं पृणानः। स्वदाति हव्यं मधुना घृतेन। स्तोकानामिंदुं प्रति शूर इंद्रः। वृषायमाणो वृष
भस्तुराषाट्। घृतप्रुषा मधुना हव्यमुंदन्। मूर्धन्यज्ञस्य जुषतां स्वाहा॥४॥ आ धर्मा
णो महोभिः पत्नीर्हि न त्वा रिव॥५॥ ॥आ चर्षणिप्रा विवेषयन्मा। तं संध्रीची
सत्यमित्तं न त्वावाँ अन्यो अस्ति। इंद्र देवो न मर्त्यो ज्यायान्। आ हन्नाहिं परिशयानम

आ॰द्वि॰

॥६५॥

र्वा॥ अश्वास्तजोयो अच्छा समुद्रं। प्रसस्रा हिषेपुरुहूत शत्रून्। ज्येष्ठस्तेशुष्मइहरातिरस्तु।
इंद्रा भरदक्षिणेनावसूनि। पातिः सिंधूनामसिरेवतीनां। अग्नेद्वेधमधिधाद्युम्नमस्मे।
महिक्षत्रंजनाषाडिंद्रतव्यं। रक्षाचनोमघोनःपाहिसूरीन्। रायेचनःस्वपत्याइषेधाः।
॥१॥ रेवतीनांचत्वारि॥४॥ ॥देवंबर्हिरिंद्रंसुदेवंदेवैः। वीरवत्स्तीर्णंवेद्यामवर्धयत्। वस्तोर्वृतंप्राक्तोर्भृतं। राया बर्हिष्मतोत्यगात्। वसुवनेवसुधेयस्यवेतुयज। देवीर्द्वारइंद्रंसंघाते। विड्वीर्याममन्नवर्धयन्। आवत्सेनतरुणेनकुमारेणचमीवितापार्वाणं। रेणुककाटंनुदंतां। वसुवनेवसुधेयस्यवियंतुयज॥२॥ देवीउषासानक्ता। इंद्रंयज्ञेप्रयत्यह्वेतां। देवीर्विशःप्रायासिष्टां। सुप्रीतेसुधितेअभूतां। वसुवनेवसुधेयस्यवीतां। यज। देवीजोष्ट्रीवसुधिती। देवमिंद्रमवर्धतां। अयाव्यन्याघाद्वेषांसि। आन्यावाक्षीद्वसु ॥ ६५ ॥
वार्याणि। यजमानायशिक्षिते॥३॥ वसुवनेवसुधेयस्यवीतांयज। देवीऊर्जाहुतीदुघे

सुदुघे। पयसेंद्रमवर्धतां। इषमूर्जमन्यावाक्षीत्। सग्धिंसपीतिमन्या। नवेनपूर्वंदयमाने। न
पुराणेननवं। अधातामूर्जमूर्जाहुती वसुवार्याणि। यजमानायशिक्षिते। वसुवनेवसुधेयस्यवीतांयज॥४॥ देवादैव्याहोतारा। देवमिंद्रमवर्धतां। हताघशंसावाभार्ष्टां वसुवार्याणि। यजमानायशिक्षितौ। वसुवनेवसुधेयस्यवीतांयज। देवीस्तिस्रस्तिस्रोदेवीः। पतिमिंद्रमवर्धयन्। अस्पृक्षद्भारती दिवं। रुद्रैर्यज्ञंसरस्वती। इडावसुमतीगृहान्॥५॥
वसुवनेवसुधेयस्यवियंतुयज। देवइंद्रोनराशंसः। त्रिवरूथस्त्रिवंधुरः। देवमिंद्रमवर्धयत्। शतेनशितिपृष्ठानामाहितः। सहस्रेणप्रवर्तते। मित्रावरुणेदस्यहोत्रमर्हतः। बृहस्पतिस्तोत्रं। अश्विनाध्वर्यवं। वसुवनेवसुधेयस्यवेतुयज॥६॥ देवइंद्रोवनस्पतिः। हिरण्यपर्णोमधुशाखः सुपिप्पलः। देवमिंद्रमवर्धयत्। दिवमग्रेणाप्रात्। आंतरिक्षंपृथिवीमदृंहीत्। वसुवनेवसुधेयस्यवेतुयज। देवंबर्हिर्वारितीनां। देवमिं

श्रा॰द्वि॰ ६

॥ ६६॥

मवर्धयत्। स्वासस्थमिंद्रेणा सनं। अन्या बर्हीः व्यभ्यस्तत्। वसुवनेवसुधेयस्य वेतुयज। देवोअग्निस्विष्टकृत्। देवमिंद्रमवर्धयत्। स्विष्टं कुर्वन्स्विष्टकृत्। स्विष्टमद्यकरोतुनः। वसुवनेवसुधेयस्य वेतुयज॥ ९॥ वियंतु यज त्रिशिक्षिते शिक्षिते वसुवनेवसुधेयस्य वीतां यज गृहान्वेतु यजाभ्भूत्स्वड्॥ १०॥ ॥ देवं बर्हिर्देवी द्वारो देवी उषासानक्ता देवी जोष्ट्री देवी ऊर्जाहुती देवा दैव्या होतारा त्रिशिक्षितो देवी स्तिस्रस्तिस्रो देवी र्देवं द्रं द्रोनराशंसो देव इंद्रो वनस्पतिर्देवं बर्हिर्वारितीनां देवो अग्निस्विष्टकृद्देवं॥ ॥ वेतु वियंतु वेतु वेतु वश्ता को वियंतु वेतु वेतु॥ ॥ अवर्धयदवर्धयन्त्रिरवर्धतामे को वर्धयन्न्वेतु रवर्धयत्॥ ॥ वस्तोरावस्से न देवी रया विषः हता स्तस्य च्छतेनन दिवः स्वासस्थः स्विष्टं॥ ॥ शिक्षिते शिक्षिते शिक्षितो॥ ॥ होतायक्षत्समिधाग्निमिड स्पते। अश्विनेंद्रं सरस्वतीं। अजो धूम्रो न गोधूमैः कुवलैर्भेषजं। मधुशष्पैर्न तेज इंद्रियं। पयः सोमः परिस्रुता

॥ ६६॥

घृतं मधु। वियंत्वाज्यस्य होतर्यज। होतायक्षत्तनूनपात्सरस्वती। अविर्मेषो न भेषजं। पथा मधुमता भरन्। अश्विनेंद्राय वीर्यं॥ १॥ बदरैरुपवाका भिर्भेषजं तोक्मभिः। पयः सोमः परिस्रुता घृतं मधु। वियंत्वाज्यस्य होतर्यज। होतायक्षन्नराशंसं न नग्नहुं। पतिं सुरायै भेषजं। मेषः सरस्वती भिषक्। रथो न चंद्र्यश्विनोर्वपा इंद्रस्य वीर्यं। बदरैरुपवाका भिर्भेषजं तोक्मभिः। पयः सोमः परिस्रुता घृतं मधु। वियंत्वाज्यस्य होतर्यज॥ २॥ होतायक्षदिड ऊडित आजुह्वानः सरस्वती। इंद्रं बलेन वर्धयन्। ऋषभेण गवेंद्रियं। अश्विनेंद्राय वीर्यं। यवैः कर्कंधुभिः। मधु लाजैर्न मासरं। पयः सोमः परिस्रुता घृतं मधु। वियंत्वाज्यस्य होतर्यज। होतायक्षद्बर्हिः सुष्टरीमोर्णम्रदाः। भिषङ्नासत्या॥ ३॥ भिषजाश्विनाश्वा शिशुमती। भिषग्धेनुः सरस्वती। भिषग्दुह इंद्राय भेषजं। पयः सोमः परिस्रुता घृतं मधु। वियंत्वाज्यस्य होतर्यज। होतायक्षद्दुरो दिशः

स्य

श्री॰ द्वि॰ ६ कवष्यो न व्यचस्वतीः। अश्विभ्यां न दुरो दिशः। इंद्रो न रोदसी दुघे। दुहे कामान्त्सरस्वती ॥ ॥ म

॥६५॥ अश्विनेंद्राय भेषजं। शुक्रं न ज्योतिरिंद्रियं। पयः सोमः परिस्रुता घृतं मधु। वियंत्वाज्य

वे ३ स्य होतर्यज। होता यक्षत्सुपेशसोषे नक्तं दिवा। अश्विना संजानाने। समंजाते सरस्वत्या।

त्विषिमिंद्रे न भेषजं। श्येनो न रजसा हृदा। पयः सोमः परिस्रुता घृतं मधु ॥ ५ ॥ वियंत्वाज्य

स्य होतर्यज। होता यक्षद्दैव्या होतारा भिषजाश्विना। इंद्रं न जागृवी दिवा नक्तं न भेषजैः।

शूषं सरस्वती भिषक्। सीसेन दुह इंद्रियं। पयः सोमः परिस्रुता घृतं मधु। वियंत्वा

ज्यस्य होतर्यज। होता यक्षत्तिस्रो देवीर्न भेषजं। त्रयस्त्रिधातवोपसः। रूपमिंद्रे हि

रण्ययं ॥ ६ ॥ अश्विनेडा न भारती। वाचा सरस्वती। मह इंद्राय दधुरिंद्रियं। पयः सो

मः परिस्रुता घृतं मधु। वियंत्वाज्यस्य होतर्यज। होता यक्षत्त्वष्टारमिंद्रमश्विना। भिष ॥ ६ ॥

जं न सरस्वतीं। ओजो न जूतिरिंद्रियं। वृको न रभसो भिषक्। यशः सुरया भेषजं ॥ ७ ॥

श्रिया न मासरं। पयः सोमः परिस्रुता घृतं मधु। वियंत्वाज्यस्य होतर्यज। होता यक्षद्वन

स्पतिं। शमितारं शतक्रतुं। भीमं न मन्युं राजानं व्याघ्रं नमसाश्विना भामं। सरस्वती भि म

षक्। इंद्राय दुह इंद्रियं। पयः सोमः परिस्रुता घृतं मधु। वियंत्वाज्यस्य होतर्यज ॥ ८ ॥

होता यक्षदग्निं स्वाहाज्यस्य स्तोकानां। स्वाहा मेदसां पृथक्। स्वाहा छागमश्विभ्यां।

५ हा स्वाहा मेषं सरस्वत्यै। स्वाहर्षभमिंद्राय सिंहाय सहस इंद्रियं। स्वाहाग्निं न भेषजं। स्वा

हा सोममिंद्रियं। स्वाहेंद्रं सुत्रामाणं सवितारं वरुणं भिषजां पतिं। स्वाहा वनस्प

तिं प्रियं पाथो न भेषजं। स्वाहा देवा आज्यपान् ॥ ९ ॥ स्वाहाग्निं होत्राज्जुषाणो अग्नि

स्य २ र्भेषजं। पयः सोमः परिस्रुता घृतं मधु। वियंत्वाज्यस्य होतर्यज। होता यक्षदश्विना सरस्वती

मिंद्रं सुत्रामाणं। इमे सोमाः सुरामाणः। छागैर्न मेषैर्ऋषभैः सुताः। शष्पैर्न तोक्मभिः।

लाजैर्महस्वंतः। मदा मासरेण परिष्कृताः। शुक्राः पयस्वंतोमृताः। प्रस्थिता वो मधुश्चुतः

ग्रा॰ हि॰ तानश्विना सरस्वतींद्रः सुत्रामा वृत्रहा। जुषंतां सोम्यं मधु। पिबंतु मदंतु वियंतु सोमस्य
॥ ६७॥ होतर्यज॥ १०॥ वीर्यं वियंत्वाज्यस्य होतर्यज नासत्या सरस्वतीमधु हिरण्ययं भेषजं
म जं वियंत्वाज्यस्य होतर्यजाज्यपानैताः प्रवेव॥ ११॥ ॥ समिधाग्निः षट्। तनू
नपात्सप्त। नराशंसः सप्तर्षिः। इडेडिति तोय वैरष्टो। बर्हिः सप्त। दुरो नव। सुपेशसा षर्षिः। दे
व्या होतारौ तो रसः। तिस्रस्त्वष्टा रमस्त्वा वष्ठो। वनस्पतिमर्षिः। अग्निं त्रयोदश। अश्विना
द्वादश त्रयोदश॥ ॥ समिधाग्निः सरस्वत्यश्विना सर्व वियंतु। द्वारस्तिस्रः सर्व वि
यंतु॥ ॥ अजइंद्रमो जोग्निं परः सरस्वतीं। अन्यत्र सरस्वती। भिषक्पूर्वैंदुहइंद्रियं॥
अन्यत्रदधुरिंद्रियं॥ ॥ समिद्धो अग्निरश्विना। तप्तो घर्मो विराट् सुतः। दुहे धेनुः सर
स्वती। सोमः शुक्रमिहेंद्रियं। तनूपा भिषजा सुते। अश्विनोभा सरस्वती। मध्वा रजांसींद्रियं। इंद्राय पथिभिर्वहान्। इंद्रायेंदुः सरस्वती। नराशंसेन नग्नहुं॥ १॥ अधा ॥ ६७॥

ताश्विना मधु। भेषजं भिषजा सुते। आजुह्वाना सरस्वती। इंद्रायेंद्रिया णि वीर्यं। इडा
भिरश्विना विषं। समूर्जं सं रयिं दधुः। अश्विना नमुचेः सुतं। सोमं शुक्रं परिस्रुता।
सरस्वती तमाभरत्। बर्हिषेंद्राय पातवे॥ २॥ कवष्यो न व्यचस्वतीः। अश्विभ्यां न दुरो दि
शः। इंद्रो न रोदसी दुघे। दुहे कामान्सरस्वती। उषासानक्तमश्विना। दिवेंद्रं सायमिं
२ द्रियैः। संजानाने सुपेशसा। समंजाते सरस्वत्या। पातन्नो अश्विना दिवा। पाहि नक्तं स
रस्वति॥ ३॥ दैव्या होतारा भिषजा। पातमिंद्रं सचा सुते। तिस्रस्त्रेधा सरस्वती। अ
श्विना भारती इडा। तीव्रं परिस्रुता सोमं। इंद्राय सुषवुर्मदं। अश्विना भेषजं मधु। भेषजं नः
सरस्वती। इंद्रे त्वष्टा यशः श्रियं। रूपं रूपमधुः सुते। ऋतुथेंद्रो वनस्पतिः। शशमानः
परिस्रुता। कीलालमश्विभ्यां मधु। दुहे धेनुः सरस्वती। गोभिर्न सोममश्विना। मासरेण परिष्कृता। समधातां सरस्वत्या। स्वाहेंद्रे सुतं मधु॥ ६॥ नग्नहुं पातवे सरस्वत्यधु

श्रा॰दि॰ य

सुते स्तोच॥२२॥ ॥अश्विना हविरिंद्रियं। नमुचेर्धिया सरस्वती॥ आशुक्रमासुराद्व
॥६४॥ सु। मघमिंद्राजेभ्यिरे। यमश्विना सरस्वती। हविषेंद्रमवर्धयन्। स विभेद वलं मघं। न
मुचावासुरे सचा। तमिंद्रं पशवः सचा। अश्विनोभा सरस्वती॥१॥ दधाना अभ्यनूषत।
हविषा यज्ञमिंद्रियं। य इंद्र इंद्रियं दधुः। सविता वरुणो भगः। स सुत्रामा हविष्पतिः। य
जमानाय सश्चत। सविता वरुणो दधत्। यजमानाय दाशुषे। आदत्त नमुचेर्वसु। सुत्रा
मा बलमिंद्रियं॥२॥ वरुणः क्षत्रमिंद्रियं। भगेन सविता श्रियं। सुत्रामा यशसा बलं।
दधाना यज्ञमाशत। अश्विना गोभिरिंद्रियं। अश्वेभिर्वीर्यं बलं। हविषेंद्रं सरस्वती।
यजमानमवर्धयन्। ता नासत्या सुपेशसा। हिरण्यवर्तनी नरा। सरस्वती हविष्मती।
इंद्र कर्मसु नोवत। ता भिषजा सुकर्मणा। सा सुदुघा सरस्वती। स वृत्रहा शतक्रतुः। ॥६४॥
इंद्राय दधुरिंद्रियं॥३॥ उभा सरस्वती बलमिंद्रियं नराषद्॥२३॥ ॥देवं बर्हिः

श्वानरेणोपतिष्ठे॥ अयं ते योनिर्ऋत्वियः॥ यतो जातो अरोचथाः॥
तं जानन्नग्न आरोह॥ अथा नो वर्द्धया रयिं॥ या ते अग्ने यज्ञिया
तनूस्तयेह्यारोहात्मात्मानं॥ अच्छा वसूनि कृण्वन्नस्मे नर्या पुरू
णि॥ यज्ञो भूत्वा यज्ञमासीद स्वां योनिं॥ जातवेदो भुव आजा
यमानः सक्षय एहि॥ उपावरोह जातवेदः पुनस्त्वं॥८॥ देवे
भ्यो हव्यं वह नः प्रजानन्॥ आयुः प्रजां रयिमस्मासु धेहि॥
अजस्रो दीदिहि नो दुरोणे॥ तमिंद्रं जोहवीमि मघवानमुग्रं।

ऋ०सं०द्वि
७०

सत्राहध्यानमप्रतिष्कुतं शवांऽसि ॥ मंऽहिष्ठो गीर्भिरा च यज्ञियो
ववर्तत् ॥ तं येनो विश्वा सुपथा कृणोतु वज्री ॥ त्रिकद्रुकेषु महिषो
यवाशिरं तुविशुष्म स्तृपत् ॥ सोममपिबद्विष्णुना सुतं यथा
वशत् ॥ स ईं ममाद महि कर्म कर्तवे महामुरुं ॥९॥ सैनंऽस
श्चद्देवं देवः सत्यमिंदुंऽ सत्य इंद्रः ॥ विदद्यती सरमा रुग्णमद्रेः ॥
महि पाथः पूर्व्यंऽ सध्रियक्कः ॥ अग्रं नयत्सुपद्यक्षराणां ॥ अच्छा
रवं प्रथमा जानती गात् ॥ विदद्गव्यंऽ सरमा दृढमूर्वं ॥ येनानु

शिव
७०

कं मानुषी भोजते विट् ॥ आ ये विश्वा स्वपत्यानि चक्रुः ॥ कृण्वानासो
अमृतत्वाय गातुं ॥ त्वं नृभिर्नृपते देवहूतौ ॥१०॥ भूरीणि वृत्रा ह
र्यश्व हंऽसि ॥ त्वं नि दस्युं चुमुरिं ॥ धुनिं चास्वापयो दभीतये सुहं
तु ॥ एवा पाहि प्रत्नथा मंदतु त्वा ॥ श्रुधि ब्रह्म वावृधस्वोत गीर्भिः ॥
आविः सूर्यं कृणुहि पीपिहीषः ॥ जहि शत्रूंऽरभि गा इंद्र तृंधि ॥
अग्ने बाधस्व वि मृधो नुदस्व ॥ अपामीवा अप रक्षांऽसि सेध ॥
अस्मात्समुद्राद्बृहतो दिवो नः ॥११॥ अपां भूमानमुप नः सृजेह ॥

ञ्ज्ञप्रतितिष्ठसुमतोसुश्लोकाआता॥वसून्निपुरुधाविश्रांतु॥दीर्घमा
युर्यजमानायकृण्वन्नू॥अधामतेनजरितारमङ्डिः॥इंद्रःशुनावद्
द्धितेनोतिसीरे॥संवत्सरस्यप्रतिमाणमेतत्॥अर्कस्यज्योतिस्त
दिदासज्येष्ठं॥संवत्सरꣳशुनवत्सीरमेतत्॥इंद्रस्यराधःप्रयतंपुरु
त्मना॥तदर्कंरूपंविमिमानमेति॥द्वादशारेप्रतितिष्ठतीद्वृषा॥अ
श्वायंतोगव्यंतोवाजयंतः॥हवामहेत्वोपगंतवाउ॥आभूषंतस्त्वासु
मतौनवायां॥वयमिंद्रत्वाशुनꣳहुवेम॥३२॥अर्चलहविर्गायतयꣳस
र्च्चर्षणीनांवैश्वानरंभल्याहासीतमुरुदेवहूतौनस्त्मनाषट्च॥८॥प्राणो
उदेहिपुनरानोभरपक्षो रायोवात्रेहस्याबसूनाꣳसदपाम्यष्टो॥प्राणोधर्मेरंस
नभी राधारावरामरुतोदीर्घांपुत्वापज्योतिषात्तापंचचतारिंशत्॥८१॥हरिःओम्

पु

ताः

त

वेत्वाज्यस्यहोतर्यज।होतायक्षत्सचेतसा।देवानामुत्तमंयशः।होतारादैव्याकवी।
सयुजेंद्रंवयोधसं।जगतींछंदइहेंद्रियं।अनड्वाहंगांवयोदधत्।वेत्वाज्यस्यहोत
र्यज।होतायक्षत्पेशस्वतीः॥५॥तिस्रोदेवीर्हिरण्ययीः।भारतीर्बृहतीर्महीः।पति
मिंद्रंवयोधसं।विराजंछंदइहेंद्रियं।धेनुंगांनवयोदधत्।वेत्वाज्यस्यहोतर्यज।
होतायक्षत्सुरेतसं।त्वष्टारंपुष्टिवर्धनं।रूपाणिबिभ्रतंपृथक्।पुष्टिमिंद्रंवयोध
सं॥६॥द्विपदंछंदइहेंद्रियं।उक्षाणंगांनवयोदधत्।वेत्वाज्यस्यहोतर्यज।हो
तायक्षद्वनस्पतिं।शमितारंशतक्रतुं।हिरण्यपर्णमुक्थिनं।रशनांबिभ्रतंवशिं।भगमिंद्रंवयोधसं।
ककुभंछंदइहेंद्रियं।वशांवेहतंगांनवयोदधत्।वेत्वाज्यस्यहोतर्यज।होतायक्ष
त्स्वाहाकृतीः।अग्निंगृहपतिंपृथक्।वरुणंभेषजंकविं।क्षत्रमिंद्रंवयोधसं।अति
छंदसंछंदइंद्रियं।बृहदृषभंगांवयोदधत्।वेत्वाज्यस्यहोतर्यज॥७॥दधेरध

श्रा·दि·

दृता दधद् इंद्रियं पेशस्वतीर्वयो धत्सं वेत्वाज्यस्य होतर्यज समन्व॥१७॥ ॥दुदस्य

॥७३॥ दग्निं गायत्रीं त्र्यविं। शुचिव्रतं शुचिमुष्णिहं दित्यवाहं। इडेन्यं सोममनुष्टुभं त्रिव

त्सं। सुबर्हिषदमनुमतें द्रं बृहतीं पंचाविं। श्रावस्वतीः सुप्रायणा ब्रह्माणः पंक्तिमि

हतुर्यवाहं। सुपेशसे विश्वमिंद्रं त्रिष्टुभं पष्ठवाहं। प्रचेतसा सयुजें द्रं जगतीमिहा

नड्वाहं। पेशस्वतीस्तिस्रः पतिं विराजमिह धेनुं न। सुरेतसं त्वष्टारं पुष्टिं द्विपदमिहो

क्षाणन्न। शाततक्रतुं भगामिंद्रं ककुभमिह वशान्न। स्वाहाकृतीः क्षत्रमतिछंदसं

बृहदृषभं गां वयो दधत॥ ॥ समिद्धो अग्निः समिधा। सुषमिद्धो वरेण्यः। गा

यत्री छंद इंद्रियं। त्र्यविर्गौर्वयो दधुः। तनूनपाच्छुचिव्रतः। तनूपाश्च सरस्वती। उ

ष्णिक् छंद इंद्रियं। दित्यवाड्गौर्वयो दधुः। इडाभिरग्निरीड्यः। सोमो देवो अमर्त्यः॥१॥ ॥७३॥

अनुष्टुप् छंद इंद्रियं। त्रिवत्सो गौर्वयो दधुः। सुबर्हिरग्निः पूषण्वान्। स्तीर्णब

र्हिरमर्त्यः। बृहती छंद इंद्रियं। पंचाविर्गौर्वयो दधुः। दुरो देवी दिशो महीः। ब्रह्मा देवो

बृहस्पतिः। पंक्तिश्छंद इहेंद्रियं। तुर्यवाड्गौर्वयो दधुः॥२॥ उषे यह्वी सुपेशसा। विश्वे दे

वा अमर्त्याः। त्रिष्टुप् छंद इंद्रियं। पष्ठवाड्गौर्वयो दधुः। दैव्या होतारा भिषजा। इंद्रेण

सयुजा युजा। जगती छंद इहेंद्रियं। अनड्वान्गौर्वयो दधुः। तिस्र इडा सरस्वती। भार

ती मरुतो विशः॥३॥ विराट् छंद इहेंद्रियं। धेनुर्गौर्न वयो दधुः। त्वष्टा तुरीपो अद्भुतः।

इंद्राग्नी पुष्टिवर्धना। द्विपा छंद इहेंद्रियं। उक्षा गौर्न वयो दधुः। शमिता नो वनस्पतिः।

सविता प्रसुवन्भगं। ककुप् छंद इहेंद्रियं। वशा वेहद्गौर्न वयो दधुः। स्वाहा यज्ञं वरुणः।

सुक्षत्रो भेषजं करत्। अतिछंदाश्छंद इंद्रियं। बृहदृषभो गौर्वयो दधुः॥४॥ अमर्त्य

स्तुर्यवाड्गौर्वयो दधुर्विश्वो वेहद्गा वेहद्गौर्न वयो दधुश्चत्वारिंश॥२८॥ ॥वसंते

न ऋतुना देवाः वसवस्त्रिवृता स्तुतं। रथंतरेण तेजसा। हविरिंद्रे वयो दधुः। ग्रीष्मे

छश्रो·द्वि·६ ण देवा ऋतुना। रुद्राः पंचदशेऽस्तुतं। बृहता यशसा बलं। हविरिंद्रे वयो दधुः॥ वर्षा
पे॰ भिर्ऋतुनादित्याः स्तोमे सप्तदशे स्तुतं॥३॥ वैरूपेण विशौजसा। हविरिंद्रे वयो द
॥७४॥ धुः॥ शारदेनर्तुना देवाः एकविंश ऋभवस्तुतं। वैराजेन श्रिया श्रियं। हविरिंद्रे
ना॰ वयो दधुः॥ हेमंतेनर्तुना देवाः मरुतस्त्रिणवे स्तुतं। बलेन शक्वरीः सहः। हविरिंद्रे वयो
दधुः॥ शैशिरेणर्तुना देवाः त्रयस्त्रिंशेऽमृतं स्तुतं। सत्येन रेवतीः क्षत्रं। हविरिंद्रे व
यो दधुः॥२॥ स्तोमे सप्तदशे स्तुतं सहो हविरिंद्रे वयो दधुश्चत्वारि च॥२९॥ ॥
वसंतेन ग्रीष्मेण वर्षाभिः शारदेन हेमंतेन शैशिरेण षट्॥ ॥ देवं बर्हिरिंद्रं वयो
धसं। देवं देवमवर्धयत्। गायत्रिया छंदसेंद्रियं। तेज इंद्रे वयो दधत्। वसुवने वसु
धेयस्य वेतु यज। देवीर्द्वारो देवमिंद्रं वयोधसं। देवीर्देवमवर्धयन्। उष्णिहा छंदसेंद्रि ॥७४॥
यं। प्राणमिंद्रे वयो दधत्। वसुवने वसुधेयस्य वियंतु यज॥१॥ देवी देवं वयोधसं।

उषे इंद्रमवर्धतां। अनुष्टुभा छंदसेंद्रियं। वाचमिंद्रे वयो दधत्। वसुवने वसुधेयस्य वीतां
यज। देवी जोष्ट्री देवमिंद्रं वयोधसं। देवी देवमवर्धतां। बृहत्या छंदसेंद्रियं। श्रोत्रमिंद्रे व
यो दधत्। वसुवने वसुधेय वीतां यज॥२॥ देवी ऊर्जाहुती देवमिंद्रं वयोधसं। देवी देव
मवर्धतां। पंक्त्या छंदसेंद्रियं। शुक्रमिंद्रे वयो दधत्। वसुवने वसुधेयस्य वीतां यज।
देवा दैव्या होतारा देवमिंद्रं वयोधसं। देवा देवमवर्धतां। त्रिष्टुभा छंदसेंद्रियं। त्विषि
मिंद्रे वयो दधत्। वसुवने वसुधेयस्य वीतां यज॥३॥ देवीस्तिस्रस्तिस्रो देवीर्वयोध
सं पतिमिंद्रमवर्धयन्। जगत्या छंदसेंद्रियं। बलमिंद्रे वयो दधत्। वसुवने वसुधेय
स्य वियंतु यज। देवो नराशंसो देवमिंद्रं वयोधसं। देवो देवमवर्धयत्। विराजा छंद
सेंद्रियं। रेत इंद्रे वयो दधत्। वसुवने वसुधेयस्य वेतु यज॥४॥ देवो वनस्पतिर्देवमिंद्रं
वयोधसं। देवो देवमवर्धयत्। द्विपदा छंदसेंद्रियं। भगमिंद्रे वयो दधत्। वसुवने व

सुधेयस्य वेतु यज। देवं बर्हिर्वारितीनां देवमिंद्रं वयोधसं। देवंदेवमवर्धयत्। ककुभा छंदसेंद्रियं। यशा इंद्रे वयो दधत्। वसुवने वसुधेयस्य वेतु यज। देवो अग्निः स्विष्ट कृद्देवमिंद्रं वयोधसं। देवो देवमवर्धयत्। अतिछंदसा छंदसेंद्रियं। क्षत्रमिंद्रे वयो दधत्। वसुवने वसुधेयस्य वेतु यज॥ ५॥ वियंतु यज वीतां यज वीतां यज वैयंज तु वेतु यज अपं च च॥ २०॥ ॥ स्वाद्वीं त्वा सोमः सुरावं तरं सीसेन मित्रो सियद्देवा होता यक्षत्समिधेंद्रं समिद्ध इंद्र आचर्षणि प्रादेवं बर्हिर्होता यक्षत्सामिधाग्निः स मिद्धो अग्निरश्विना श्विना हविरिंद्रियं देवं बर्हिः सरस्वत्यग्निमद्यो ग्नौ तो होता यक्ष दिउस्पदे समिद्धा अग्निः समिधा वसं तेन देवं बर्हिरिंद्रं वयो धसं विं ग्नातिः॥ २०॥ ॥७५॥
य स्वाद्वीं त्वा मीमदं तपितरः साम्राज्यां पूतं पवित्रेणोषासानक्ता बदरैरघातामश्विना

देवइंद्रो वनस्पतिः पष्ठवाहं गां देवी देवं वयोधसं चतुर्नवतिः॥ २४॥ ॥ओम्॥ ॥ ॥ ॥ छ॥ ॥हरिः ओम्॥ ॥देवं बर्हिर्गायत्रिया तेजः देवी द्वारउष्णिहा प्राणं। देवी देवमुषे अनुष्टुभा वार्यं। देवी जोष्ट्री बृहत्या श्रोत्रं। देवी ऊर्जाहुती पंक्त्या शुक्रं। देवा दैव्या होतारा त्रिष्टुभा त्विषिं। देवी स्तिस्रस्तिस्रो देवीः पतिं जगत्या बलं। देवो नराशंसो विराजा रेतः देवो वनस्पतिर्द्विपदा भगं। देवं बर्हिर्वारितीनां ककुभा यशः देवो अग्निः स्विष्टकृदतिछंदसा क्षत्रं॥ ॥ छ॥ ॥हरिः ओम्॥ ॥त्रिवृत्स्तोमो भवति। ब्रह्मवर्चसं वै त्रिवृत्। ब्रह्मवर्चसमेवावरुंधे। अग्निः ष्टोमः सोमो भवति। ब्रह्मवर्चसं वा अग्निष्टोमः। ब्रह्मवर्चसमेवावरुंधे। रथंतरं साम भवति। ब्रह्मवर्चसं वै रथंतरं। ब्रह्मवर्चसमेवावरुंधे। परिस्रजी होता भवति॥ १॥ अरुणो मिर्मिरस्त्रिशुक्रः। एतद्वै

ब्रा॰ द्वि॰
सु॰
॥७६॥

ब्रह्मवर्चसस्य रूपं । रूपेणैव ब्रह्मवर्चसमवरुंधे । बृहस्पतिरकामयत देवानां पुरोधां गच्छेयमिति । स एतं बृहस्पतिसवमपश्यत् । तमाहरत् । तेनायजत । ततो वै स देवानां पुरोधामगच्छत् । यः पुरोधाकामः स्यात् । स बृहस्पतिसवेन यजेत ॥१॥ पुरोधामेव गच्छति । तस्य प्रातःसवने सन्नेषु नाराशꣳसेषु । एकादश दक्षिणा नीयंते । एकादश माध्यंदिने सवने संनेषु नाराशꣳसेषु । एकादश तृतीयसवने संनेषु नाराशꣳसेषु । त्रयस्त्रिꣳशत् संपद्यंते । त्रयस्त्रिꣳशद्वै देवताः । देवता एवावरुंधे । अश्वश्चतुस्त्रिꣳशः । प्राजापत्यो वा अश्वः ॥ ॥२॥ प्रजापतिश्चतुस्त्रिꣳशो देवतानां । यावतीरेव देवताः । ता एवावरुंधे । कृष्णाजिनेऽभिषिंचति । ब्रह्मणो वा एतद्रूपं । यत्कृष्णाजिनं । ब्रह्मवर्चसेनैवैनꣳ ॥७६॥ समर्धयति । आज्येनाभिषिंचति । तेजो वा आज्यं । तेज एवास्मिन्दधाति ॥४॥

सन्ने

होता भवति यजेत वा अश्वो दधाति ॥१॥ ॥ यदाग्नेयो भवति । अग्निमुखा ह्यृद्धिः । अथ यत्पौष्णः । पुष्टिर्वै पूषा । पुष्टिर्वैश्यस्य । पुष्टिमेवावरुंधे । प्रसवाय सावित्रः । अथ यत्त्वाष्ट्रः । त्वष्टा हि रूपाणि विकरोति । निर्वरुणत्वाय वारुणः ॥१॥ अथो य एव कश्च सस्नूयते । स हि वारुणः । अथ यद्वैश्वदेवः । वैश्वदेवो हि वैश्यः । अथ यन्मारुतः । मारुतो हि वैश्यः । सप्तैतानि हवीꣳषि भवंति । सप्तगणा वै मरुतः । पृश्निः पष्ठौही मारुत्यालभ्यते । विड्वै मरुतः । विश एवैतन्मध्यतोऽभिषिच्यते । तस्माद्वा एष विशः प्रियः । विशो हि मध्यतोऽभिषिच्यते । ऋषभचर्मण्यभिषिंचति । स हि प्रजनयिता । दध्नाभिषिंचति । ऊर्ग्वा अन्नाद्यं दधि । ऊर्जैवैनमन्नाद्येन समर्धयति ॥२॥ वारुणो विड्वै मरुतोऽष्टौ च ॥२॥ ॥ यदाग्नेयो भवति । आग्नेयो वै ब्राह्मणः । अथ

ब्रा॰हि॰ यत्सौम्यः। सौम्यो हि ब्राह्मणः। प्रसवायैव सावित्रः। अथ यद्बार्हस्पत्यः। एतद्धि ब्राह्मण
॥७३॥ स्य वाक्पतीयं। अथ यदग्नीषोमीयः। आग्नेयो वै ब्राह्मणः। तौ यदा संगछेते॥१॥ अ
थ वीर्यावत्तरो भवति। अथ यत्सारस्वतः। एतद्धि प्रत्यक्षं ब्राह्मणस्य वाक्पतीयं। नि
र्वरुणत्वायैव वारुणः। अथो य एवं कश्च सन्त्सूयते। स हि वारुणः। अथ यद्द्यावापृथि
व्यः। इंद्रो वृत्राय वज्रमुद्यच्छत्। तं द्यावापृथिवी नान्वमन्येतां। तमेतेनैव भागधेये
नान्वमन्येतां॥२॥ वज्रस्य वा एषोनुमानाय। अनुमतवज्रः सूयाता इति। अष्टावे
तानि हवींषि भवंति। अष्टाक्षरा गायत्री। गायत्री ब्रह्मवर्चसं। गायत्रियैव ब्रह्मव
र्चसमवरुंधे। हिरण्येन घृतमुत्पुनाति। तेजस एव रूपे। कृष्णाजिनेभिषिंचति। ॥७४॥
ब्रह्मणो वा एतद्रूपं यदृक्सामयो रूपं। यत्कृष्णाजिनं। ब्रह्मन्नेवैनमृक्सामयोर

घृतेनाभिषिंचति।

भ्यभिषिंचति। तथा वीर्यावत्तरो भवति॥२॥ संगछेते भागधेयेनान्वमन्येतां रूपं च
त्वा रिच॥३॥ ॥ न वै सोमेन सोमस्य सवोस्ति। हतो ह्येषः। अभिषुतो ह्येषः। न हि ह
मा॰ तः सूयते। सोमींः सूतवशाँल्लभते। सोमो वै रेतोधाः। रेत एव तद्धाति। सोम्यर्चा
भिषिंचति। रेतोधा ह्येषा। रेतः सोमः। रेत एवास्मिन्दधाति। यत्किंच राजसूयमृते सो
मं। तत्सर्वं भवति। आषाढं युत्सु पृतनासु पप्रिं। सुवर्षामप्स्वां वृजनस्य गोपां। भरेषु
जाः सुक्षितिं सुश्रवसं। जयंतं त्वामनुमदेम सोम॥१॥ रेतः सोमः सप्त च॥४॥
प यो वै सोमेन सूयते। स देवसवः। यः पशुना सूयते। स देवसवः। य इष्ट्या सूयते। स म
नुष्यसवः। एतं वै पृथये देवाः प्रायछन्। ततो वै सोप्यारण्यानां पशूनामसूयत। य
त्किंचाप्यतीश्च प्रजा वा एवं वदंति। तासां सर्वासां सूयते॥२॥ य एतेन यजते। य उ चै
मेवं वेद। नाराशंस्यर्चाभिषिंचति। मनुष्या वै नराः शंसः। निरुत्सवा वै तद्[illegible]

ब्रा·द्वि· ॥७५॥

भिषिंचति। यत्किंच राजसूयमनुत्तरवेदीकं। तत्सर्वं भवति। येमेपंचा शतंदुग्धः। अभ्‍-
नाः स्वधस्तुतिः। युमदग्ने महिश्रवः। बृहद्रभिम घोनां। त्वदन्म तनूणां॥ २॥ सूर
सुधस्तुतिस्त्री णिच॥ ५॥ ॥ एषगोसवः। षड्विंशः उक्थ्यो बृहत्सामा। पवमा
एव रथंतरं भवति। यो वै वाजपेयः। ससंम्राट्सवः। यो राजसूयः। स वरुणसवः। प्र
तिः स्वाराज्यं परमेष्ठी। स्वाराज्यं गोरेव। गोरिवसवति॥ २॥ यएतेनयजते। यउ
मेवं वेद। उभे बृहद्रथंतरे सवतः। तद्धिस्वाराज्यं। अयुतं दाक्षिणाः। तद्धिस्वाराज्यं

रा

प्रतिधुषाभिषिंचति। तद्धिस्वाराज्यं। अनुहूतेवैयै दक्षिणत आहवनीयस्य बृहतस्तो
त्रं प्रत्यभिषिंचति। इयं वाव रथंतरं॥ ३॥ असौ बृहत्। अनयोरेवेनमनंतर्हितमभि
षिंचति। पशुस्तोमो वा एषः। तेन गोसवः। षड्विंशः सर्वः। रेवज्जातः सहसा वृद्धः। ॥७५॥
क्षत्राणां क्षत्र भृत्तमो वयोधाः। महान्महित्वे तस्तभानः। क्षत्रे राष्ट्रे च जागृहि। प्रजा

पते स्त्वा परमेष्ठिनः स्वाराज्येनाभिषिंचामीत्याह। स्वाराज्यमेवैनं गमयति॥ ४॥ इयं वाभ
वति रथंतरमाहेके च॥ ६॥ ॥ सिंहे व्याघ्रे उत या पृदाकौ। त्विषिरग्नौ ब्राह्मणे सूर्ये मु
या। इंद्रं या देवी सुभगा जजान। सा न आगन्वर्चसा संविदाना। या राजन्ये दुंदुभावाय
तायां। अश्वस्य क्रंदे पुरुषस्य मायौ। इंद्रं या देवी सुभगा जजान। सा न आगन्वर्चसा सं
विदाना। या हस्तिनि द्वीपिनि या हिरण्ये। त्विषिरश्वेषु पुरुषेषु गोषु॥ २॥ इंद्रं या दे
सुभगा जजान। सा न आगन्वर्चसा संविदाना। रथे अक्षेषु वृषभस्य वाजे। वाते प
र्न्ये वरुणस्य शुष्मे। इंद्रं या देवी सुभगा जजान। सा न आगन्वर्चसा संविदाना। स्वा
विराडसि। संम्राडसि स्वराडसि। इंद्राय त्वा तेजस्वते तेजस्वंतं श्रीणामि। इंद्रा
यौजस्वत ओजस्वंतं श्रीणामि॥ २॥ इंद्राय त्वा पयस्वते पयस्वंतं श्रीणामि। इं
द्राय त्वा युष्मत आयुष्मंतं श्रीणामि। तेजोसि। तत्ते प्रयच्छामि। तेजस्वदस्तु मे ग्रा

वा

ब्रा॰ द्वि॰ ॥८१॥

अनुत्वा विश्वेदेवा अवंतु। अनु सप्तराजानो यउताभिषिक्ताः। अनुत्वा मित्रावरुणा
हावंतु। अनुद्यावापृथिवी विश्वशंभू। सूर्यो अहोभिरनुत्वावतु। चंद्रमा नक्षत्रैर
त्वावतु। द्यौश्चत्वा पृथिवी च प्रचेतसा। शुक्रो बृहद्दक्षिणा पिपर्तु। अनुस्वधा वि
ताः। सोमो अग्निः। आयं पृणक्तु रजसी उपस्थे॥२॥ बृहस्पतिः सोमो अग्निरेकं च
॥ प्रजापतिः प्रजा असृजत। ता अस्मात्सृष्टाः पराचीरायन्। स एतं प्रजापतिरो
नमपश्यत्। सोऽन्नं भूतोऽतिष्ठत्। ता अन्यत्रान्नाद्यमवित्वा। प्रजापतिं प्रजा उपावर्त
त। अन्नमेवैनं भूतं पश्यंतीः प्रजा उपावर्तंते। य एतेन यजते। य उ चैनमेवं वेद। सर्वा

+ श्री

ण्यन्नानि भवंति॥१॥ सर्वपुरुषाः सर्वाण्येवान्यवरुंधे। सर्वान्पुरुषान्। राडसि ॥८॥
विराडसीत्याह। स्वाराज्यमेवैनं गमयति। यद्धिरण्यं ददाति। तेजस्तेनावरुंधे। य

त्तिसृधन्वं। वीर्यं तेन। यद्रुक्मं॥२॥ पुष्टिं तेन। यत्कंसं उलूं। आयुष्टेन। यद्धिरण्यमाबध्ना
ति। ज्योतिर्वै हिरण्यं। ज्योतिरेवास्मिन्दधाति। अथो तेजो वै हिरण्यं। तेज एवात्मन्धत्ते।
यदोदनं प्राश्नाति। एतदेव सर्वमवरुध्य॥३॥ तदस्मिन्नेकधाधात्। रोहिण्यां कार्यः। य
द्ब्राह्मण एव रोहिणी। तस्मादेव। अथो वर्ष्मैवैनं समानानां करोति। उद्यता सूर्येण का
र्यः। उद्यंतं वा एतं सर्वाः प्रजाः प्रतिनंदंति। दिदृक्षेण्यो दर्शनीयो भवति। य एवं वे
ब्रह्मवादिनो वदंति॥४॥ अवेत्यो वस्त्था ३ ना ३ इति। यद्दर्भपुंजीलैः पवयति। त
देवावैति। तन्नावैति। त्रिभिः पवयति। त्रय इमे लोकाः। एभिरेवैनं लोकैः पवय
अथो अपां वा एतत्तेजो वर्चः। यद्दर्भाः। यद्दर्भपुंजीलैः पवयति। अपामेवैनं तेज
वर्चसा भिषिंचति॥५॥ सर्वं त्वग्रामवरुध्य वदंति दर्शाय दर्भपुंजीलैः पवयत्य

णा

यो

ब्रा॰ द्वि॰ ॥२॥ ॥प्रजापतिरकामयत बहोर्भूयान्स्यामिति। स एतं पंचशारदीयमपश्यत्तमाहरत्। तेनायजत। ततो वै स बहोर्भूयानभवत्। यः कामयेत बहोर्भूयान्स्यामिति स पंचशारदीयेन यजेत। बहोरेव भूयान्भवति। मरुत्स्तोमो वा एषः मरुतो हि देवानां भूयिष्ठाः॥१॥ बहुर्भवति। य एतेन यजंते। य उ चैनमेवं वेद। पंचशारदीयो पंच वा ऋतवः संवत्सरः। ऋतुष्वेव संवत्सरे प्रतितिष्ठति। अथो पंचाक्षरा पंक्तिः पांक्तो यज्ञः। यज्ञमेवावरुंधे। सप्तदशाः स्तोमा नातियंति। सप्तदशः प्रजापतिः प्रजापतेराप्त्यै॥२॥ भूयिष्ठा यंति ह वै॥१०॥ ॥अगस्त्यो मरुद्भ्य उक्ष्णः प्रौक्षत्। तानिंद्र आदत्त। त एनं वज्रमुद्यत्याभ्यायंत। तानगस्त्यश्चैवेंद्रश्च कयाशुभीयेनाशमयतां। तांच्छांतानुपाह्वयत। यत्कयाशुभीयं भवति शांत्यै। तस्मादेत ऐंद्रामारुता उ ॥८१॥

॥८१॥

क्षाणः सवनीया भवंति। त्रयः प्रथमेहन्नालभ्यंते। एवं द्वितीये। एवं तृतीये।॥१॥ एवं चतुर्थे। पंचोत्तमेहन्नालभ्यंते। वर्षिष्ठमिव ह्येतदहः। वर्षिष्ठः समानानां भवति। य एतेन यजंते। य उ चैनमेवं वेद। स्वाराज्यं वा एष यज्ञः। एतेन वा एककयावाकाद्मः स्वाराज्यमगच्छत्। स्वाराज्यं गच्छति। य एतेन यजंते॥२॥ य उ चैनमेवं वेद। मारुतो वा एष स्तोमः। एतेन वै मरुतो देवानां भूयिष्ठा अभवन्। भूयिष्ठः समानानां भवति। य एतेन यजंते। य उ चैनमेवं वेद। पंचशारदीयो वा एष यज्ञः। आ पंचमात्पुरुषादन्नमत्ति। य एतेन यजंते। य उ चैनमेवं वेद। सप्तदशाः स्तोमा नातियंति। सप्तदशः प्रजापतिः प्रजापतेरेव नैति॥३॥ तृतीये गच्छति य एतेन यजंते तिय एतेन यजंते य उ चैनमेवं वेद त्रीणि च॥११॥ ॥अस्या जरासो दमामरित्राः अर्चद्धूमासो अग्नयः पावकाः। श्वितीचयः श्वात्रासो भुरण्यवः। वनर्षदो वायवो न सोमाः। यजानो मित्रावरुणा।

म

श्री॰ऋ॰ ७ यज्ञो देवाँ ऋतं बृहत्। अग्ने यक्षि स्वं दमं। अश्विना पिबतं सुतं। दीद्यग्नी शुचिव्रता। ऋतु
॥८२॥ ना यज्ञवाहसा॥१॥ द्वे विरूपे चरतः स्वर्थे। अन्यान्या वत्समुप धापयेते। हरिरन्य
स्यां भवति स्वधावान्। शुक्रो अन्यस्यां ददृशे सुवर्चाः। पूर्वापरं चरतो माययैतौ। शिशू क्री
डन्तौ परियातो अध्वरं। विश्वान्यन्यो भुवनाभिचष्टे। ऋतूँरन्यो विदधज्जायते पुनः। त्री
णि शता त्री सहस्राण्यग्निं। त्रिंशच्च देवा नव चासपर्यन्॥२॥ औक्षन्घृतैरस्तृणन्ब
र्हिरस्मै। आदिद्धोतारं न्यसादयन्त। अग्निनाग्निः समिध्यते। कविर्गृहपतिर्युवा। ह
व्यवाड्जुह्वास्यः। अग्निर्देवानां जठरं। पूतदक्षः कविक्रतुः। देवो देवेभिरागमत्। अ
ग्ने श्रियो मरुतो विश्वकृष्टयः। आ त्वेषमुग्रमव ईमहे वयं॥३॥ ते स्वानिनो रुद्रिया व
र्षनिर्णिजः। सिंहा न हेषक्रतवः सुदानवः। यदुत्तमे मरुतो मध्यमे वा। यद्वावमे सुभगा ॥८२॥
वि सो दिवि। ततो नो रुद्रा उत वा न्वस्य। अग्ने वित्ताद्धविषो यद्यजामः। ईळे अग्निं स्ववस

नमोभिः। इह प्रसत्तो वि चयत्कृतं नः। रथैरिव प्र भरे वाजयद्भिः। प्रदक्षिणिन्मरुतां स्तो णि
ममृध्यां॥४॥ श्रुधि श्रुत्कर्ण वह्निभिः। देवैरग्ने सयावभिः। आसीदन्तु बर्हिषि। मित्रो व
रुणो अर्यमा। प्रातर्यावाणो अध्वरं। विश्वेषामदितिर्यज्ञियानां। विश्वेषामतिथिर्मानु
षाणां। अग्निर्देवानामव आवृणानः। सुमृळीको भवतु विश्ववेदाः। त्वे अग्ने सुमतिं भि
क्षमाणाः॥५॥ दिवि क्षयन्तो दधिरे यज्ञियासः। नक्ता च चक्रुरुषसा विरूपे। कृष्णं च वर्णम
रुणं च सं धुः। त्वामग्न आदित्यास आस्यं। त्वां जिह्वां शुचयश्चक्रिरे कवे। त्वां रातिषाचो अ
ध्वरेषु सश्चिरे। त्वे देवा हविरदन्त्याहुतं। नि त्वा यज्ञस्य साधनं। अग्ने होतारमृत्विजं। वनु
ष्वद्देव धीमहि प्रचेतसं। जीरं दूतममर्त्यं॥६॥ यज्ञवाहसा सपर्यन्वयसध्यां भिक्षमाण
प्रचेतसमेकं च॥१२॥ ॥तिष्ठा हरी रथ आ युज्यमाना याहि। वायुर्न नियुतो नो अ
च्छ। पिबास्यन्धो अभिसृष्टो अस्मे। इन्द्र स्वाहा ररिमा ते मदाय। कस्य वृषा सुते स
चा।

ब्रा॰ द्वि॰
॥८२॥

नियुत्वान्वृषभो रणत्। वृत्रहा सोमपीतये। इंद्रं वयं महाधने। इंद्रमर्भे हवामहे। युजं
वृत्रेषु वज्रिणं॥१॥ द्विता यो वृत्रहंतमः। विद इंद्रः शतक्रतुः। उप नो हरिभिः सुतं। म
र आजनयज्ज्योतिरिंद्रं। अया धिया तरणिरद्रिबर्हाः। ऋतेन शुष्मी नवमानो अर्कै
स्त्रिधो अस्रो अद्रिर्विभेद। उत त्यदाश्वश्व्यं। यदिंद्र नाहुषीष्वा। अग्ने विक्षु प्रदी
दयत्॥२॥ नरं ... इंद्रं सुहवं हवामहे। अंहोमुचं सुकृतं दैव्यं जनं। अग्निं मित्रं वरु
णं सातये भगं। द्यावापृथिवी मरुतः स्वस्तये। महि क्षेत्रं पुरु श्चंद्रं विविद्वान्। आदि
त्सखिभ्यश्चरथं समैरत्। इंद्रो नृभिरजनद्दीद्यानः साकं। सूर्यमुषसं गातुमग्निं।
उरुं नो लोकमनु नेषि विद्वान्। सुवर्वज्ज्योतिरभयं स्वस्ति॥३॥ ऋष्वा त इंद्र स्थवि
रस्य बाहू। उप स्थेयाम शरणा बृहंता। आ नो विश्वाभिरूतिभिः सजोषाः। ब्रह्म जुषा ॥८२॥
र्य णो हर्यश्व याहि। वरीवृजत्स्थविरेभिः सुशिप्र। अस्मे दधद्वृषणं शुष्ममिंद्र। इंद्राय

गाव आशिरं। दुदुह्रे वज्रिणे मधु। यत्सीमुपह्वरे विदत्। तास्ते वज्रिन्धेनवो जोजयुर्नः। ग न
भस्तयो नियुतो विश्ववाराः। अहरहर्यस्य इन्द्रो गुवानाः। पूर्णा इंद्र क्षुमतो भोजनस्य।
इमां ते धियं प्रभरे महो महीं। अस्य स्तोत्रे धिषणा यत्त आनजे। तमुत्सवे च प्रसवे च
सासहिं। इंद्रं देवासः शवसामदन्ननु॥४॥ वज्रिणमय स्वस्ति जोजयुर्नः सस्तच॥
॥१३॥ ॥प्रजापतिः पशूनसृजत। तेस्मात्सृष्टाः पराञ्च आयन्। तानग्निष्टोमेन ना
प्नोत्। तानुक्थ्येन नाप्नोत्। तान्षोडशिना नाप्नोत्। तान्रात्रिया नाप्नोत्। तान्संधि
ना नाप्नोत्। सोग्निमब्रवीत्। इमान्म ईप्सेति। तानग्निस्त्रिवृता स्तोमेन नाप्नोत्। स॥
स इंद्रमब्रवीत्। इमान्म ईप्सेति। तानिंद्रः पंचदशेन स्तोमेन नाप्नोत्। स विश्वान्दे
वानब्रवीत्। इमान्म ईप्सतेति। तान्विश्वेदेवाः सप्तदशेन स्तोमेन नाप्नुवन्। स...

ग्रा·द्वि·
॥८४॥

ष्णुमब्रवीत्। इमान्मर्ईसेति। तान्विष्णुरेकविंशेनस्तोमेनाप्नोत्। वार्वंतीयेनावा[...]
यत॥२॥ इदंविष्णुर्विचक्रमइतिव्यक्रमत। यस्मात्सत्रावः प्रभ्रेवस्थ्यंज्ञौरन्। सल्वे[...]
यजेत। यदाप्नोत्। तदप्तोर्यामस्याप्तोर्यामत्वं। एतेनवैदेवाजेत्वानिजित्वा। यं[...]मम
कामयंततमाप्नुवन्। यंकामंकामयते। तमेतेनाप्नोति॥३॥ स्तोमेननाभोदवारयतनं
वच॥२४॥ ॥व्याघ्रोयमग्नौचरतिप्रविष्टः। ऋषीणांपुत्रोअभिशस्तिपाअयं।
नमस्कारेणनमसातेजुहोमि। मादेवानांमिथुयाकर्मभागं। सावीर्हिदेवप्रसवायपि
त्रे। वर्ष्माणमस्मैवमोरिणमस्मै। अथस्मभ्यं सवितः सर्वताता। दिवेदिवआसु
वाभूरिपश्वः। भूतोभूतेषुचरतिप्रविष्टः। सभूतानामधिपतिर्बभूव॥१॥ तस्यमृ
त्यौचरतिराजसूयं। सराजाराज्यमनुमन्यताभिदं। येभिःशिल्पैःपप्रथानामहं

दे·
॥८४॥

हत्। येभिर्घामस्यपिंशद्प्रजापतिः। येभिर्वाचंविश्वरूपांसमव्ययत्। तेनेममग्न
इहवर्चसासमंग्धि। येभिरादित्यस्तपतिप्रकेतुभिः। येभिःसूर्योददृशेचित्रभानुः।
येभिर्वाचंपुष्कलेभिरव्ययत्। तेनेममग्नइहवर्चसासमंग्धि॥२॥ आयंभातुश्रवसा
पंचकृष्टीः। इंद्रइवज्येष्ठोभवतुप्रजावान्। अस्माअस्तुपुष्कलंचित्रभानु। आयंपृ
णक्तुरजसीउपस्थं। यत्तेशिल्पंकश्यपरोचनावत्। इंद्रियावत्पुष्कलंचित्रभानु। यस्
मिन्त्सूर्याअर्पिताःसप्तसाकं। तस्मिन्राजानमधिविश्रयेमं। योरसिपृथ्वीव्य
सि। व्याघ्रोवैयाघ्रेधि॥३॥ विश्रयस्वदिशोमहीः। विशस्त्वासर्वावां[...]मा
त्वद्राष्ट्रमधिभ्रशत्। यादिव्याआपःपयसासंबभूवुः। याअंतरिक्षउत[...]र्थि
वीर्याः। तासांत्वासर्वासांरुचा। अभिषिंचामिवर्चसा। अभित्वावर्चसासिचं[...]

श्री·द्वि०

॥स्त॥

त्या॰३

व्येन। पयसा सह। यथासा राष्ट्रवर्धनः॥४॥ तथा त्वा सविता करत्। इंद्रं विश्वा अ
वीवृधन्। समुद्रव्यचसं गिरः। रथीतमं रथीनां। वाजानां सत्पतिं पतिं॥ प्राच्य
स्त्वा पुरस्तादभिषिंचंतु गायत्रेण छंदसा। रुद्रास्त्वा दक्षिणतोभिषिंचंतु त्रैष्टुभे
न छंदसा। आदित्यास्त्वा पश्चादभिषिंचंतु जागतेन छंदसा। विश्वे त्वा देवा उत्तरतो
भिषिंचंतु आनुष्टुभेन छंदसा। बृहस्पतिस्त्वोपरिष्टादभिषिंचंतु पांक्तेन छंद
सा॥५॥ अरुणं त्वा वृकमुग्रं खजंकरं। रोचमानं मरुतामग्रे अर्चिषः। सूर्यवंत
मघवानं विषासहिं। इंद्रमुक्थेषु नामहूतमं हुवेम। प्रबाहवा सिसृतं जीवसे
नः। आ नो गव्यूतिमुक्षतं घृतेन। आ नो जने श्रवयतं युवाना। श्रुतं मे मित्रावरुणा ॥स्त॥
हवेमा। इंद्रस्य ते वीर्यकृतः। बाहू उपावहरामि॥६॥ बभ्रुवाब्ययत्तेनेममपद्र

हवर्चसा समंक्ष्व वैयाघ्रे धिराष्ट्रवर्धनः पांक्तेन छंदसोपावहरामि॥१५॥ ॥अ
भिमेहि वीर्यस्व। उग्रश्चेत्ता सपत्नहा। आ तिष्ठ वृत्रहं तमः। तुभ्यं देवा अधि ब्रुवन्।
अंकौन्यंकावभितो रथं यो। ध्वांतं वाताग्रमनुसंचरंतौ। दूरेहेतिरिंद्रियावान्पतत्री।
तेनोग्नयः पप्रयः पारयंतु। नमस्तं ऋषेगद। अव्यथायै त्वा स्वधायै त्वा॥१॥ मा न
इंद्राभितस्त्वदृष्वारिष्टासः। एवा ब्रह्मन्तवेदस्तु। तिष्ठा रथे अधि यद्वज्रहस्तः। आ
रश्मीं देवयुव से स्वश्वः। आ तिष्ठ वृत्रहन्रथं। आतिष्ठं तं परि। अनु त्वेंद्रो मदत्वनु त्वा मि
त्रावरुणौ। ध्रौश्च त्वा पृथिवी च प्रचेतसा। शुक्रो बृहद्दक्षिणा त्वा पिपर्तु। अनु
स्वधा चिकितां सोमो अग्निः। अनु त्वावतु सविता सवेन॥२॥ इंद्रं विश्वा अवीवृ
धन्। समुद्रव्यचसं गिरः। रथीतमं रथीनां। वाजानां सत्पतिं पतिं। परिमा

अ॰ दि॰ तु॰ न्या घोषाः। ज्यानौ हृंजं ग्रु ध्रकः। मे थिष्ठाः। पिन्वमाना इह। मां गोपतिमभि सं विशंतु
॥८५॥ तन्मे नुमतिरनुमन्यतां। तन्माता पृथिवी तत्पिता द्यौः॥३॥ तद्ग्रावाणः सोमसुतो मय
भुवः। तदश्विना शृणुतं सौभगाय युवं। अव ते हेडउ उदुत्तमं। एना व्याघ्रं परिषस्वजान
सिंहं हिन्वंति महते सौभगाय। समुद्रं न सुहुवं तस्थिवां सं। मर्मृज्यंते द्वीपिनो
प्स्वं तः। उदसावेतु सूर्यः। उदिदं मामकं वचः। उदिहि देव सूर्य। सह वग्नुना मम। अ
वाचो विवाचनं। मयि वाग स्तु धर्णसिः। यंतु नद्यो वर्षंतु पर्जन्याः। सुपिप्पला ओ
षधयो भवंतु। अन्नवतामोदनवतां मामिक्षवतां। एषां राजा भूयासं॥४॥ स्वधांपि
त्वा सवेन घोः सूर्यसमव॥२६॥ ॥ ये केशिनः प्रथमाः सत्रमासत। येभिराभृ
तं यदिदं विरोचते। तेभ्यो जुहोमि बहुधा घृतेन। रायस्पोषेणेमं वर्चसा सं सृजाथ।

नर्ते ब्रह्मणास्तपसो विमोकः। दीना दीक्षा वशिनी शुग्रा। प्रकेशाः सुवते कां डिनो भ
वंति। तेषां ब्रह्मेदीशे वपनस्य नान्यः। आरोह प्रोष्ठं विषहस्व शत्रून्। अवा स्राग्दीक्षाव
शिनी ह्युग्रा॥१॥ देहि दक्षिणां प्रतिरस्वायुः। अथा मुच्यस्व वरुणस्य पाशात्। येना वप
त्सविता क्षुरेण। सोमस्य राज्ञो वरुणस्य विद्वान्। तेन ब्रह्माणो वपतेदमस्यो र्जमं र
य्या वर्चसा सं सृजाथ। मा ते केशाननुगा द्वर्च एतत्। तथा धाता करोतु ते। तुभ्यमिं
द्रो बृहस्पतिः। सविता वर्च आदधात्॥२॥ तेभ्यो निधानं बहुधा व्यैछन्। अंतरा द्या
वापृथिवी अपस्सुवः। दर्भस्तंबे वीर्य कृते निधाय। पौंस्येनेमं वर्चसा सं सृजाथ। ब
लं ते बाहुवोः सविता दधातु। सोमस्त्वानक्तु पयसा घृतेन। स्त्रीषु रूपमश्विनैतन्नि
धत्तं। पौंस्येनेमं वर्चसा सं सृजाथ। यत्क्षीमं तक्ष्णं तस्ते लिलेख। यद्वा क्षुरः परिवव
र्ज वपं स्ते। स्त्रीषु रूपमाश्विनैतं निधत्तं। पौंस्येनेमं सं सृजाथा वीर्येण॥

प्रा॰ ह्रि॰
॥७४॥
सं॰

अवी स्वाग्दीस्त्रावृशिनी घृष्या दधा इवर्जेवपः स्तेद्वेत्॥१७॥ ॥इंद्रं वैस्वा विशो
मरुतो नापाचायन्। सोनपचाय्यमान एतं विघनमपश्यत्। तमाहरत्। तेनायजत।
तेनैवासां तंः स्तंभं व्यहन्। यद्व्यहन्। तद्विघनस्य विघनत्वं। विपाप्मानं भ्रातृव्यं हन्
ते। यएतेन यजते। यउचैनमेवं वेद॥१॥ यं राजानं विशो नापचायेयुः। यो वा ब्राह्म
णस्तमसा पाप्मना प्रावृतः स्यात्। सएतेन यजेत। विघनेनैवैनं द्विहत्य। विशामाधि
पत्यं गच्छति। तस्य द्वे द्वादश्नौ स्तोत्रे स्तवतः। द्वे चतुर्विंशे। ओड्रियमेव तत्। एतं हस्मै
स्यो ड्रियं। यदस्मै स्वा विशो बलिं हरंति॥२॥ हरंत्यस्मै विशो बलिं। ऐनमप्रतिख्या
तं गच्छति। यएवं वेद। प्रबाहुग्वा अग्रे क्षत्राण्यासन्। तेषामिंद्रः क्षत्राण्यादत्त। नवा
इमानि क्षत्राण्यभूवन्निति। तन्नक्षत्राणां नक्षत्रत्वं। आभ्रियसाम्राज्यं तव्यस्य तेजः इंद्रियं ॥७४॥
दत्ते। यएतेन यजते। यउचैनमेवं वेद॥३॥ तद्यथा ह वै सचक्रिणौ कल्कावुपावहितो

स्यातां। एवमेतौ युग्मंतौ स्तोमौ। अयुक्ष्वस्तोमे क्रियेते। पाप्मनोपहत्यै। अपपाप्मा
नं भ्रातृव्यं हते। यएतेनयजते। यउचैनमेवं वेद। तद्यथा ह वै स्तुतया मण्यः। एवं छंदां
सि। तेषु सा वा दित्यो बृहती रश्म्यूढः॥४॥ सतो बृहती षु स्तुवते सतो बृहन्। प्रजया पशु
भिरसानीत्येव। व्यतिषक्ताभिः स्तुवते। व्यतिषक्तं वै क्षत्रं विशा। विशो वै नं क्षत्रेण व्यति
षजति। व्यतिषक्ताभिः स्तुवते। व्यतिषक्तो वै ग्रामणीः सजातैः। सजातैरेवैनं व्यतिषज
ति। व्यतिषक्ताभिः स्तुवते। व्यतिषक्तो वै पुरुषः पाप्मभिः। व्यतिषक्ताभिरेवास्य पाप्म
नो नुदते॥५॥ वेद हरंत्येनमेवं वेद। व्यूढः पाप्मभिरेकं च॥१८॥ ॥त्रिवृद्घदाग्ने
न
योग्निमुखाल्प द्वियदाग्नेय आग्नेयो वै सोमेन यो वै सोमेनेष्टगो सवः सिं [illegible]प्रे
हि मित्रवर्धनः प्रजापतिस्ताः सृष्टा ओदनं प्रजापतिरकामयत बहोस्यां अनु स्यां
जरा सस्तिष्ठा हरीं प्रजापतिः पशून्व्याघ्रो यमभिप्रेहि वृत्रहं तमाम के शिनं [illegible]देवे

श्रा॰हि॰ ॥९५॥

स्वाविश्वोष्टादृत्रा॥२८॥ ॥त्रिवृद्योवेसोनायुरसिविश्वायुर्वहुर्भवतिविद्याहरीर
थआयंभ्रातुतेभ्योनिधानं॥षट्षष्टिः॥६६॥ ॥ओम॥ ॥छ॥ ॥छ॥
॥॥हरिःओम्॥ ॥पीवोंनाः रयिवृधः सुमेधाः।श्वेतः सिषक्ति नियुता
मभिश्रीः।तेवायवेसमनसोवितस्थुः।विश्वेन्नरः स्वपत्यानिचक्रुः।रायेनुयंजज्ञु
रोदसीउभे।रायेदेवीधिषणाधातिदेवं।अधावायुंनियुतः सश्चतस्वाः।उतश्वे
वसुधितिंनिरेके।आवायोप्रयाभिः।प्रवायुमच्छाबृहतीमनीषा॥१॥बृहद्रयिंवि
श्ववारंरथप्रां।द्युतद्यामानियुतःपत्यमानः।कविःकविमियक्षसिप्रयज्यो।आ
नोनियुद्भिःशतिनीभिरध्वरं।सहस्त्रिणीभिरुपयाहियज्ञं।वायोअस्मिन्हवि
षिमादयस्व।यूयंपातस्वस्तिभिः सदानः।प्रजापतेनत्वदेतान्यन्यः।विश्वाजाता
निपरिताबभूव।यत्कामास्तेजुहुमस्तन्नोअस्तु॥२॥वयंस्यामपतयोरयीणां।

रयीणांपतिंयजतंबृहंतं।अस्मिन्भरेनृतमंवाजसातौ।प्रजापतिंप्रथमजामृतस्या।
यजामदेवमधिनोब्रवीतु।प्रजापतेत्वंनिधिपाःपुराणः।देवानांपिताजनिताप्र
जानां।पतिर्विश्वस्यजगतःपरस्याः।हविर्नोदेवविहवेजुषस्व।तवेमेलोकाःप्रदि
शोदिशश्च॥३॥परावतोनिवतउद्वतश्च।प्रजापतेविश्वसृज्जीवधन्यइदंनोदेव।
प्रतिहर्यहव्यं।प्रजापतिंप्रथमंयज्ञियानां।देवानामग्रेयजतंयजध्वं।सनोददातु
द्रविणंसुवीर्यं।रायस्पोषंविष्यतुनाभिमस्मे।योरायईशेशतदायउक्थः।यः
पशूनांरक्षिताविष्ठितानां।प्रजापतिःप्रथमजाऋतस्य॥४॥सहस्रधामाजु
षतांहविर्नः।सोमापूषणेमौदेवौ।सोमापूषणारजसोविमानं।सप्तचक्रंरथ
मविश्वमिन्वं।विषूवृतंमनसायुज्यमानं।तंजिन्वथोवृषणापंचरश्मिं।दिव्यन्यः
सदनंचक्रउच्चा।पृथिव्यामन्योअध्यंतरिक्षे।तावस्मभ्यंपुरुवारंपुरुक्षुं।रायस्पो

श्री॰दि॰ षंविष्यतान्नाभिमस्मे॥५॥धियंपूषाजिन्वतुविश्वमिन्वंः रयिंःसोमोरायिपतिर्दधा

॥८०॥ तु।अवतुदेव्यदितिरनुर्वा।बृहद्वदेमविदथेसुवीराः।विश्वान्यन्योभुवनाजजानवि

श्वमन्योअभिचक्षाणएति।सोमापूषणाववतंधियंमे।युवाभ्यांविश्वाःपृतनाजयेम।

उदुत्तमंवरुणात्तन्नाद्यां।यत्किंचेदंकितवासः।अवत्तहेडस्तत्वायामि।आदित्याना

मवसानदक्षिणा।धारयंतआदित्यासस्तिस्त्रोभूमीर्धारयन्।यज्ञोदेवानांप्रति

रपः॥६॥मनीषास्तचर्तस्यास्मेकितवासश्वत्वामित्र॥२॥ ॥तेभ्युक्षासःशु

चयोरश्मिवंतः।सीदन्त्वादित्याअधिबर्हिषिप्रिये।कामेदेवाःसरथंदिवोनःआ

यांतुयज्ञमुपनोजुषाणाः।तेसूनवोअदितेःपीवसामिषं।घृतंपिन्वन्तिहर्यन्त ॥८०॥

तेजाः।प्रयज्ञियायज्ञमानायचेमुरे।आदित्याःकामंपितुमंतमस्मे।आनःपुत्रा

अदितेर्यातुयज्ञं।आदित्यासःपथिभिर्देवयानैः॥१॥अस्मेकामंदाशुषेसंनमंतः।

यज्ञियानां।आराच्छत्रुमपबाधस्वदूरं।उग्रोयःशंबःपुरुहूततेन।अस्मेधेहियवमद्गो

मदिंद्र।कृधीधियंजरित्रेवाजरत्नां।आ॰बुधसःसहिभ्युविंः।बृहस्पतिःप्रथमंजाय

मानः।महो।ज्योतिषःपरमेव्योमन्।सप्तास्यस्तुविजातोरवेण।विसप्तरश्मिरधम

त्तमांसि॥७॥बृहस्पतिःसमजयद्वसूनि।महोव्रजानोमतोदेवएषः।अपःसिषा

सन्त्सुवरप्रतीतः।बृहस्पतिर्हंत्यमित्रमर्कैः।बृहस्पतेपर्यथावापित्रे।आनोदिवःपा

वीरवी।इमाजुह्वानायस्तेस्तनं॥सरस्वत्यासिनोनेषि।इयंशुष्मेभिर्बिसखाइ

इवारुजत्।सानुगिरीणांतविषेभिरूर्मिभिः।पारावतघ्नीमवसेसुवृक्तिभिःस

रस्वतीमाविवासेमधीतिभिः॥८॥देवयानैर्देवाःसुपूतंयजत्रहस्तमस्तिमंत

माःस्पूर्मिभिर्हैव॥२॥ ॥सोमोधेनुंःसोमाअर्वंतमाशुं।सोमोवीरंकर्म

ऋ॰ हि॰
॥ २१ ॥

ण्यं ददातु । सादन्यं विदथ्यं सभेयं । पितुश्रवणं यो ददाशदस्मै । अषाढं युत्सु त्वं सो
म क्रतुभिः । या ते धामा नि हविषा यजंति । त्वमिमा ओषधीः सोम विश्वाः । त्वमपो अज
नयस्त्वं गाः । त्वमा ततंथोर्वंतरिक्षं । त्वं ज्योतिषा वि तमो ववर्थ ॥ १ ॥ या ते धामानि
दिवि या पृथिव्यां । या पर्वतेष्वोषधीष्वप्सु । तेभिर्नो विश्वैः सुमना अहेळन् । राज
न्सोम प्रति हव्या गृभाय । विष्णोर्नु कं । तदस्य प्रियं । प्र तद्विष्णुः । परो मात्रया तन्वा
वृधान । न ते महित्वमन्वश्नुवंति । उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं । परम
स्य वित्से ॥ २ ॥ विचक्रमे त्रिर्देवः । आ ते महो यो जात एव । अभि गोत्राणि । आ तिष्ठ
धो मिथतीररिषण्यन् । अमित्रस्य व्यथया मन्युमिंद्र । आ भिर्विश्वा अभियुजो वि ॥ २१ ॥
षूचीः । आर्याय विशो वतारीर्दासीः । अयं श्रृण्वे अध जयन्नुत घ्नन् । अयमुत प्र

णुते युधा गाः । यदा सत्यं कृणुते मन्युमिंद्रः ॥ ३ ॥ विश्वं दृढं भयत एजदस्मात् । अनु स्व
धामक्षरन्नापो अस्य । अवर्धत मध्य आ नाव्यानां । सध्रीचीनेन मनसा तमिंद्र ओ
जिष्ठेन । हन्मनाहन्नभि द्यून् । मरुत्वंतं वृषभं वावृधानं । अकवारिं दिव्यं शासमिंद्रं ।
विश्वासाहमवसे नूतनाय । उग्रं सहोदामिह तं हुवेम । जनिष्ठा उग्रः सहसे तुरा
य । मंद्र ओजिष्ठो बहुलाभिमानः । अवर्धन्निंद्रं मरुतश्चिदत्र । माता यद्वीरं दधनद्ध
निष्ठा । क्व स्या वो मरुतः स्वधासीत् । यन्मामेकं समधत्ताहिहत्ये । अहं ह्युग्रस्तवि
षस्तुविष्मान् । विश्वस्य शत्रोरनमं वधस्नैः । वृत्रस्य त्वा श्वसथादीषमाणाः ॥ ४ ॥ वि
श्वे देवा अजहुर्ये सखायः । मरुद्भिरिंद्र सख्यं ते अस्तु ॥ ५ ॥ अथेमा विश्वाः पृतना
जयासि । वधीं वृत्रं मरुत इंद्रियेण । स्वेन भामेन तविषो बभूवान् । अहमेता मन

ब्रा॰ हि॰ ८ वे विश्वश्चर्षिणीनां। सुगा अपश्चकर वज्रबाहुः। सयो वृषा वृष्णियेभिः समोकाः। महो दि-
॥९२॥ वः पृथिव्याश्च सम्राट्। सतीनसत्वा हव्यो भरेषु। मरुत्वान्नो भवत्विंद्र ऊती। इंद्रो वृ
तर २ त्रमहं त्रतूर्यै॥६॥ अनाधृष्यो मघवा शूर इंद्रः। अन्वेनं विशो अमदंतपूर्वीः। अयं रा
जा जगतश्चर्षणीनां। स एव वीरः स उ वीर्यावान्। स एकराजो जगतः परस्याः। यदा वृत्र
मतरच्छूर इंद्रः। अथाभव द्दमिताभिक्रतूनां। इंद्राय वृत्रं वर्धयन् विश्ववेदाः। पुरोडाशस्य जु
षतां हविर्नः। वृत्रं तीर्त्वा दानवं वज्रबाहुः॥७॥ दिवो दृहं हदृहं हिता दृं हणेन। इम
यहं वर्धय। न्विश्ववेदाः। पुरोडाशं प्रतिगृभ्णात्विंद्रः। यदा वृत्रमतरच्छूर इंद्रः। अथै
आ २ कराजो अभवज्जनानां। इंद्रो देवान्शंबरहत्याव त। इंद्रो देवानामभवत्पुरोगाः। इंद्रा
य त्वे हविषा वावृधानः। वृत्रतूर्नो अभयं शर्म यंसत्। यः सप्त सिंधूं रदधात्पृ॥९२॥

थिव्यां। यः सप्त लोकानकृणोद्दिशश्च। इंद्रो हविष्मान्सगणो मरुद्भिः। वृत्रतूर्नो यज्ञमि
हो पयासत्॥८॥ ववर्ष विस इंद्रस्तुराय। स्तुवृत्रतूर्यं वज्रबाहुः पृथिव्यां त्रीणि च॥आ॥
॥इंद्रस्तरस्वानभिमातिहोग्रः। हिरण्यवाशी रिषिरः सुवर्षाः। तस्य वयं सुमतौ य
ज्ञियस्य। अपि भद्रे सौमनसे स्याम। हिरण्यवर्णो अभयं कृणोतु। अभिमातिहें
द्रः पृतनासु जिष्णुः। सनः शर्म त्रिवरूथं वियंसत्। यूयं पात स्वस्तिभिः सदा नः। इंद्रं
स्तुहि वज्रिणं स्तोमपृष्ठं। पुरोडाशस्य जुषतां हविर्नः॥१॥ हत्वाभिमातीः पृत
नाः सहस्वान्। अथाभयं कृणुहि विश्वतो नः। स्तुहि शूरं वज्रिणमप्रतीतं। अभि
त मातिहनं पुरुहूतमिंद्रं। य एक इत्सत्पतिर्जनेषु। तस्मा इंद्राय हविरा जुहोत। इंद्रो
देवानामधिपाः पुरोहितः। दिशां पतिरभवद्वाजिनीवान्। अभिमातिहा तविं

हि॰ १ ॥१२॥ सं॰

षस्क विश्वात्‌ । अस्मभ्यं चित्रं वृषणं रयिं दात्‌ ॥२॥ यद्‌इमे द्यावापृथिवी महित्वा । वले
नाहंऽ हरद्भिमातिहेंद्रः । सनो हविः प्रतिगृभ्णातु रातये । देवानां देवो निधिपा नो अ
व्यात्‌ ॥ अनवस्तेरथंश्वाय तक्ष्यन्‌ । इंद्रस्यनु वीर्याण्यहं नरहिं । इंद्रो यातो व सितस्य राजा ।
शमस्य च शृंगिणो वज्रबाहुः । सेदु राजा क्षेति चर्षणीनां । अराञ्च नेमिः परिताव
भूव ॥३॥ अभिसिध्मो अजिगादस्य शत्रून्‌ । वितिग्मेन वृषभेणा पुरोभेत्‌ । संवज्रे
णास्रजद्वृत्रमिंद्रः ॥ प्रस्वां मतिमतिरच्छाशदानः । विष्णुं देवं वरुणमूतये भगं ।
मेदसा देवा वपया यजध्वं । ता नो यज्ञमागतं विश्वधेना । प्रजावदस्मे द्रविणेह ध
त्तं । मेदसा देवा वपया यजध्वं । विष्णुं च देवं वरुणं च रातिं ॥४॥ ता नो अमीवा ॥१३॥
अप बाधमानौ । इमं यज्ञं जुषमाणावुपेतं । विष्णवरुणा सुयम अध्वरायनः ।

विन्नो जनो यमहिन्नामियच्छतं । दीर्घप्रयज्यू हविषा वृधाना । ज्योतिषाराती र्दहतं तमांसि ।
ययोरोजसा स्कभिता रजांसि । वीर्येभिर्वीरतमा शविष्ठा । या पत्येते अप्रतीता सहोभिः
विष्णू अगन्वरुणा पूर्वहूतौ ॥५॥ विष्णूवरुणावभिशस्तिपावा । देवा यजंत हविषा घृतेन ।
अपामीवां सेधतं रक्षसश्च । अथा धत्तं यजमानाय शंयोः । अंहोमुचा वृषभा सुप्र
तूर्ती । देवानां देवतमा शविष्ठा । विष्णूवरुणा प्रति हर्यतं नः । इदं नरा प्रयतमूतये हविः
महीनु द्यावा पृथिवी [illegible] इह ज्येष्ठे । रुचा भवतां शुचयद्भिरर्कैः ॥६॥ यत्सीं वरिष्ठे
बृहती विमिन्वन्‌ । नुवद्ध्योक्षा पप्रथानेभिरेवैः । प्र पूर्वजे पितरा नव्यसीभिः । गीर्भिः
कृणुध्वं सदने ऋतस्य । आ नो द्यावापृथिवी दैव्येन । जनेन यातं महि वां वरूथं । सर
भु त्वपा वस्त्वोषास । यदिमे द्यावापृथिवी जजान । उर्वी गभीरे रजसी सुमेके । अवंशे धी

श्री॰ द्वि॰ ८ रः श्राव्या समैरत॥७॥ भूरिं द्वे अचरंती चरंतं। पद्वंतं गर्भमपदी दधाते। नित्यं न सूनुं पित्रो

॥९५॥ रुपस्थे। तं पिपृतं रोदसी सत्यवाचं। इदं द्यावापृथिवी सत्यमस्तु। पितर्मातर्यदिहोपब्रु

वे वां। भूतं देवानामवमे अवोभिः। विद्यामेषं वृजनं जीरदानुं। उर्वी पृथ्वी बहुले दूरे अंते।

उप ब्रुवे नमसा यज्ञे अस्मिन्। दधाते ये सुभगे सुप्रतूर्ती। द्यावा रक्षतं पृथिवी नो अभ्वात्। अ

या जाता ओषधयो ति विश्वाः परिष्ठाः। या ओषधयः सोमराज्ञी। रश्वावतीः सोमवतीं।

ओषधीरिति मातरोन्या वो अन्यामवतु॥८॥ हविर्नो दाद्भ्रूवरातिं पूर्वहूतावर्केरैरद॰

स्मिन्यंचच॥४॥ ॥ श्रुधिन्नुस्तोमं श्वभ्यद्वृत्रं। उभा वामिंद्राग्नी प्रचर्षणिभ्यः।

आ वृत्रहणा गीर्भिर्विप्रः। ब्रह्मणस्पते त्वमस्य यंता। सूक्तस्य बोधि तनयं च जिन्व। ॥९७॥

विश्वं तद्भद्रं यदवंति देवाः। बृहद्वदेम विदथे सुवीराः। स ईं सत्येभिः सखिभिः शुचद्भिः।

गोधायसं विधनसैरदर्दत्। ब्रह्मणस्पतिर्वृषभिर्वराहैः॥१॥ घर्मस्वेदेभिर्द्रविणं व्यानट्। ब्र

र ह्मणस्पते भवद्यथावशं। सत्यो मन्युर्महि कर्मा करिष्यतः। यो गा उदाजत्स दिवे वि चा भ

जत्। महीव रीतिः शवसासरत्पृथक्॥२॥ इधानो अग्निं वनवद्वनुष्यतः। कृत ब्रह्मा शूशुवद्राता २

हव्य इत्। जातेन जातमति स प्र सर्स्रते। यं यं युजं कृणुते ब्रह्मणस्पतिः। ब्रह्मणस्पते सु

यमस्य विश्वहा॥३॥ रायः स्याम रथ्यो विवस्वतः। वीरेषु वीरां उप पृङ्धि नस्त्वं। यदीशा

स नो ब्रह्मणा वेषि मे हवं। स इज्जनेन स विशा स जन्मना। स पुत्रैर्वाजं भरते धना नृभिः। दे

वानां यः पितरमाविवासति। श्रद्धामना हविषा ब्रह्मणस्पतिं। यास्ते पूषन्नावो अंतः

समुद्रे। ते अन्यत्पूषेमा आन्नाः। प्रपथे पथामजनिष्ट पूषा॥४॥ प्रपथे दिवः प्रपथे पृथि

व्याः। उभे अभि प्रियतमे सधस्थे। आ च परा च चरति प्रजानन्। पूषा सुबंधुर्दिव आ।

ऋ॰ द्वि॰ ८
॥९५॥

पृथिव्याः॥ इंद्रस्यातिर्मघवा दस्मवर्चाः॥ तं देवासो अदद्युः सूर्याय। कामेनकृतं तवसं स्व
ञ्चं। अजाश्वः पशुपा वाजबस्त्यः॥ धियंजिन्वो विश्वे भुवने अर्पितः॥ अष्ट्रां पूषा शिथि
रामुद्वरीवृजत्॥७॥ संचक्षाणो भुवना देव ईयते। शुची वो हव्या मरुतः शुचीनां। शुचिं
हिनोम्यध्वरं शुचिभ्यः॥ ऋतेन सत्यमृतसाप आयन्। शुचिजन्मानः शुचयः पावकाः॥
प्र चित्रमर्कं गृणते तुराय। मारुताय स्वतवसे भरध्वं। ये सहांसि सहसा सहंते। रे
जते अग्ने पृथिवी मखेभ्यः॥ अंसेष्वा मरुतः खादयो वः॥५॥ वक्षःसु रुक्मा उपशि
श्रियाणाः॥ वि विद्युतो न वृष्टिभी रुचानाः॥ अनु स्वधामायुधैर्यच्छमानाः॥ यावः श
र्म शशमानाय संति। त्रिधातूनि दाशुषे यच्छताधि। अस्मभ्यं तानि मरुतो वि यंत। ॥९५॥
रयिं नो धत्त वृषणः सुवीरं। इमे तुरं मरुतो रामयंति। इमे सहः सहस आ नमंति। इ

मे शंसं वनुष्यतो नि पांति॥६॥ गुरु द्वेषो अररुषे दधंति। अराद्वे दत्रमा अहेव। प्रप्रजा
यंते अकवा महोभिः॥ एभिर्भुवा उपमासो रभिष्ठाः॥ स्वया मत्या मरुतः संमिमिक्षुः॥ अ
नु ते दायि मह इंद्रियाय। सत्रा ते विश्वमनु वृत्रहत्ये। अनु क्षत्रमनु सहो यजत्र। इंद्र देवे
भिरनु ते नृषह्ये। यदिंद्र शुष्मो मघवंते अस्ति॥७॥ शिक्षा सखिभ्यः पुरुहूत नृभ्यः॥ त्वं
हि दृढा मघवन्विचेताः॥ अपावृधि परिवृतिं न राधः। इंद्रो राजा जगतश्चर्षणीनां। अ
धिक्षमि विषुरूपं यदस्ति। ततो ददाति दाशुषे वसूनि। चोदद्राध उपस्तुतश्चिदर्वाक्।
तमु ष्टुहि यो अभिभूत्योजाः॥ वन्वन्नवातः पुरुहूत इंद्रः॥ अषाळ्हमुग्रं सहमानमाभिः॥
॥८॥ गीर्भिर्वर्ध वृषभं चर्षणीनां। स्तूरस्य रायो यई इंद्रो। तमु ष्टवाम विदथे ष्विंद्रं। यो
वायुना जयति गोमतीषु। प्र धृष्णुया नयति वस्यो अच्छ॥ आ ते शुष्मो वृषभ एतु पश्चात्।

आ० ङ्ङि ८ ओत्तरादधरागापुरस्तात्। आ विश्वतो अभिसमेत्वर्वाङ्। इंद्र द्युम्नं सुवर्वद्धेह्यस्मे॥

॥९५॥ ॥१॥ वयाहे विश्वहा जनित्र पूषो दूरी रजस्वा द्यो वः पाति स्त्या सिर्नवच॥५॥ ॥

आ देवो यातु सविता सुरत्नः। अंतरिक्षप्रा वहमानो अश्वैः। हस्ते दधानो नर्या पुरूणि।

निवेशयंच प्रसुवंच भूम। अभीवृतं कृशनैर्विश्वरूपं। हिरण्यशम्यं यजतो बृहंतं। आ

स्थाद्रथं सविता चित्रभानुः। कृष्णा रजांसि तविषीं दधानः। स घा नो देवः सविता

सवाय। आ सा विषद्वसुपतिर्वसूनि। विश्रयमाणो अमतिमुरूचीं। मर्तभोजनमध

रासते न। वि जनान्छ्यावाः शितिपादो अख्यन्। रथं हिरण्यप्रउगं वहंतः। शश्वद्विशः

सवितुर्दैव्यस्य। उपस्थे विश्वा भुवनानि तस्थुः। वि सुपर्णो अंतरिक्षाण्यख्यत्। गभीरवे ॥९५॥

पा असुरः सुनीथः। क्वेदानीं सूर्यः कश्चिकेत। कतमां द्यां रश्मिरस्याततान॥३॥ भगं

धियं वाजयंतः पुरंधिं। नराशंसो ग्नास्पतिर्नो अव्यात्। आये वामस्य संगथे रयीणां।

प्रिया देवस्य सवितुः स्याम। आ नो विश्वे अस्क्रा गमंतु देवाः। मित्रो अर्यमा वरुणः स

जोषाः। भुवन्यथा नो विश्वे वृधासः। करन्त्सुषाहा विथुरन्न शवः। शं नो देवा विश्व

देवा भवंतु। शं सरस्वती सह धीभिरस्तु॥४॥ शमभिषाचः शमु रातिषाचः। शं

ये- नो दिव्याः पार्थिवाः शंनो अप्याः। सवितुः सत्यसवस्य विश्वे। मित्रस्य व्रते वरु

णस्य देवाः। ते सौभगं वीरवद्गोमदप्नः। दधातन द्रविणं चित्रमस्मे। अग्ने याहि दूत्यं

वा रिषेण्यः। देवाँ अच्छा ब्रह्मकृता गणेन। सरस्वतीं मरुतो अश्विनापः। यक्षि देवा

न्रत्नधेयाय विश्वान्॥५॥ द्यौः पितः पृथिवि मातरध्रुक्। अग्ने भ्रातर्वसवो मृ

ळता नः। विश्व आदित्या अदिते सजोषाः। अस्मभ्यं शर्म बहुलं वियंत। विश्वे देवाः

शृणुतेमं हवं मे। ये अंतरिक्षे य उप द्यवि ष्ठ। ये अग्निजिह्वा उत वा यजत्राः। आसद्या

णा

ऋ॰ठि॰५ स्मि-बर्हिषि मा दयध्वं। आ वां मित्रा वरु हव्यजुष्टिं। नमसा देवा ववसा ववृत्यां॥ ॥
॥९३॥ अस्माकं ब्रह्म पृतनासु सह्या अस्माकं। वृष्टिर्दिव्या सुपारा। युवं वस्त्राणि पीवसा वसा
थे। युवोरछिद्रा मंतवो ह सर्गाः। अवातिरतमनृतानि विश्वा। ऋतेन मित्रावरुणा स
चेथे। तत्सु वां मित्रावरुणा महित्वं। ईर्मा तस्थुषी रहभिर्दुदुह्रे। विश्वाः पिन्वथः स्वसरस्य
धेनाः। अनुवामेकः पविरा ववर्ति॥ ३॥ यद्वं हिष्ठं नातिविदे सुदानू। अछिद्रं शर्म
भुवनस्य गोपा। तेन नो मित्रावरुणा ववीष्टं। सिषासंतो जीगिवांसः स्याम। आ नो
मित्रावरुणा हव्यदातिं। घृतैर्गव्यूतिमुक्षतमिडाभिः। प्रति वामत्र वरमा जनाय।
पृणीतमुद्नो दिव्यस्य चारोः। प्र बाहवा सिसृतं जीवसे नः। आ नो गव्यूतिमुक्षतं घृ ॥९४॥
तेन॥ ७॥ आ नो जने श्रवयतं युवाना। श्रुतं मे मित्रावरुणा हवेमा। इमा रुद्राय स्थिर

धन्वने गिरः। क्षिप्रेषवे देवाय स्वधाम्ने। अषाढाय सहमानाय मीढुषे। तिग्मायुधाय
भरता शृणोतन। त्वा दत्तेभी रुद्र शंतमेभिः। शतं हिमा अशीय भेषजेभिः। व्यस्मद्द्वे
षो वितरं व्यंहः। व्यमीवांश्चातयस्वा विषूचीः॥ २॥ अर्हन्बिभर्षि सायकानि ... आ
ते पितर्मरुतां सुम्नमेतु। मा नः सूर्यस्य संदृशो युयोथाः। अभि नो वीरो अर्वति क्षमे
त। प्रजायेमहि रुद्र प्रजाभिः। एवा बभ्रो वृषभ चेकितान। यथा देव न हृणीषे न हंसि। हावनश्रूर्नो रुद्रेह बोधि। बृहद्वदेम विदथे सुवीराः। परि णो रुद्रस्य हेतिर्वृणक्तु। मीढुष्टमा अर्हन्बिभर्षि। त्वमग्ने रुद्र आवो राजानं॥ ५॥ वसूनि तततानास्तृ... विश्वान्वेद
त्यां ववर्ति घृतेन विषूचीः श्रुतं हवं॥ ६॥ ॥ सूर्यो देवीमुषसं रोचमानां मर्यो
न योषामभ्येति पश्चात्। यत्रा नरो देवयंतो युगानि। वितन्वते प्रति भद्राय भद्रं॥ स्थिरा

ब्रा॰ द्धि॰ ८ अश्वा हरितः सूर्यस्य। चित्राएदग्वा अनुमाद्यासः। नमस्यंतोदिवआपृष्ठमस्थुः। परिद्या
॥९७॥ वापृथिवीयंतिसद्यः। तत्सूर्यस्यदेवत्वंतन्महित्वं। मध्याकर्तोर्विततं संजभार॥१॥ य
देदयुक्त हरितः सधस्थात्। आद्रात्रीवासः स्तनुतेसिमस्मै। तन्मित्रस्यवरुणस्याभि
चक्षे। सूर्योरूपंकृणुतेद्योरुपस्थे। अनंतमन्यद्रुशदस्यपाजः। कृष्णमन्यद्धरितः संभ
रंति। अद्यादेवाउदितासूर्यस्य। निरंहसःपिपृतानिरवद्यात्। तन्नोमित्रोवरुणोमा
महंतां। अदितिःसिंधुःपृथिवीउतद्योः॥२॥ दिवोरुक्मउरुचक्षाउदेति। दूरेअर्थस्त
रणिर्भ्राजमानः। नूनंजनाः सूर्येणप्रसूताः। आयन्नर्थानिकृणवन्नपांसि। शंनो
भवचक्षसाशंनोअन्हा। शंभानुनाशं हिमाशंघृणेन। यथाशमध्वंछमसद्दुरोणे। ॥९८॥
तत्सूर्यद्रविणंधेहिचित्रं। चित्रंदेवानामुदगादनीकं। चक्षुर्मित्रस्यवरुणस्याग्नेः॥३॥ आ

प्राद्यावापृथिवीअंतरिक्षं। सूर्यआत्माजगतस्तस्थुषश्च। त्वष्टादधत्तन्नस्तुरीपं। त्वष्टावीरं
पिशंगरूपः। दशेमंत्वष्टुर्जनयंतगर्भं। अतंद्रासोयुवतयोविभृत्रं। तिग्मानीकं स्वयश
संजनेषु। विरोचमानंपरिषींनयंति। आविष्ट्योवर्धतेचारुरासु। जिह्मानामूर्ध्वः स्व
यशाउपस्थे॥४॥ उभेत्वष्टुर्बिभ्यतुर्जायमानात्। प्रतीचीसिंहंप्रतिजोषयेते। मित्रो
जनाप्रसामित्र। अयंमित्रोनमस्यः सुशेवः। राजासुक्षत्रोअजनिष्टवेधाः। तस्यवयं
न सुमतौयज्ञियस्य। अपिभद्रेसौमनसेस्याम। अनमीवासइळयामदंतः। मितज्ञवोव
रिमन्नापृथिव्याः। आदित्यस्यव्रतमुपक्षियंतः॥५॥ वयंमित्रस्यसुमतौस्याम। मित्रे
नईं शिम्यागोषुगव्यवंतः। स्वाधियोविदथेअप्सुजीजनन्। अरेजयतां रोदसीपा
जसागिरा। प्रतिप्रियंयजतंजनुषामवः। महाँ आदित्योनमसोपसद्यः। यातयज्ज
नोगृणतेसुशेवः। तस्माएतत्पन्यतमायजुष्टं। अग्नौमित्रायहविराजुहोत। आवां

यो

श्री॰द्वि॰८ ॥१९॥

रथोरोदसीबद्बधानः॥६॥ हिरण्ययोवृषभिर्यात्वश्वैः। घृतवर्तनिःपविभी रुचानइषां वोढानृपतिर्वाजिनीवान्। सनःप्रथानोअभिपत्वभूम। त्रिवंधुरोमनसायातुयुक्तः विश्वोयेनगच्छथोदेवयंतीः।कुत्राचिद्यामममश्विनादधाना। स्वश्वायशसायातमर्वाग्दस्रानिधिंमधुमंतंपिबाथः। विवांरथोवध्वायादमानः॥७॥ अंतान्दिवोबाधतेवर्तनिभ्यां। युवोःश्रियंपरियोषावृणीत।सूरोदुहितापरितक्म्यायां। यद्देवयंतमवथःशचीभिः।परिघ्रंसमोमनावांवयोगात्। योहस्यवांरथिरावस्तउस्राः।रथोयुजानःपरियातिवर्तिः।तेननःशंयोरुषसोव्युष्टौ।न्यश्विनावहतंयज्ञेअस्मिन्। युवंभुज्युमववृद्धंसमुद्रे॥८॥ उदूहथुरर्णसोअस्रिधानैः।पतत्रिभिरश्रमैरव्यथिभिः।दंसनाभिरश्विनापारयंता।अग्नीषोमायोअद्यवां।इदंवचःसपर्यति।तस्मैधत्तंसुवीर्यं।गवांपोषं॥१९॥ स्वश्वियं।योअग्नीषोमाहविषासपर्यात्।देवद्रीचामनसायोघृतेन।तस्यव्रतंरक्षतं

पुरोडाशंघृतवंतंजुषंतां।स्रुङ्मायतानिर्ऋतिःसेधतामतिं।प्ररश्मिभिर्यतमानाअमृध्राः।आदित्याःकामप्रयतांवषट्कृतिं।जुषध्वंनोहव्यदातिंयजत्राः।आदित्यान्काममवसेहुवेम।येभूतानिजनयंतोविचिख्युः।सीदंतुपुत्राअदितेरुपस्थं।स्तीर्णंबर्हिर्हविरद्यायदेवाः॥२॥ स्तीर्णंबर्हिःसीदतायज्ञेअस्मिन्।धाजाःसेधंतोअमतिंदुरेवां।अस्मभ्यंपुत्राअदितेःप्रयंसत।आदित्याःकामहविषोजुषाणाः।अग्नेनयसुपथारायेअस्मान्।विश्वानिदेववयुनानिविद्वान्।युयोध्यस्मज्जुहुराणमेनः।भूयिष्ठांतेनमउक्तिंविधेम।प्रवःशुक्रायभानवेभरध्वं।हव्यंमतिंचाग्नयेसुपूतं।योदैव्यानिमानुषाजनूंषि।अंतर्विश्वानिविद्मनाजिगाति।अच्छागिरोमतयोदेवयंतीः।अग्निंयंतिद्रविणंभिक्षमाणाः।सुसंदृशंसुप्रतीकंस्वंचं।हव्य

ऋ॰ खि॰ बाहमरतिं मानुषाणां। अग्ने त्वमस्मद्युयोध्यमीवाः। अनग्नित्रा अभ्यमंत कृष्टीः। पुन
॥२०॥ रस्मभ्यं सुविताय देव। क्षां विश्वेभिरजरेभिर्यजत्र॥४॥ अग्ने त्वं पारया नव्यो अ
स्मान्। स्वस्तिभिरति दुर्गाणि विश्वा। पूश्च पृथ्वी बहुला न उर्वी। भवा तोकाय तन
याय शं योः। प्रकारवो मननावच्यमानाः। देवद्रीचीं नयथ देवयंतः। दक्षिणावाड्वाजि
नी प्राच्येति। हविर्भरंत्यग्नये घृताची। इंद्रं नरो युजे रथं। जगृभ्णा ते दक्षिणमिंद्र ह
स्तं॥५॥ वसूयवो वसुपते वसूनां। विद्मा हि त्वा गोपतिं शूर गोनां। अस्मभ्यं चित्रं
वृषणं रयिं दाः। तवेदं विश्वमभितः पशव्यं। यत्पश्यसि चक्षसा सूर्यस्य। गवाम ॥२१॥
स्य सि गोपतिरेक इंद्र। भक्षीमहि ते प्रयतस्य वस्वः। सामिंद्रेणा मनसा नेषि गोभिः। सं
सूरिभिर्मघवन्सं स्वस्त्या। सं ब्रह्मणा देवहृतं यदस्ति॥६॥ सं देवानां सुमत्या

पातमंहसः॥१॥ विश्रोजनाय महिशर्म यच्छतं। अग्नीषोमाय आहुतिं। यो वां दाशाद्धविष्कृतिं।
स प्रजया सुवीर्यं। विश्वमायुर्व्यश्नवत्। अग्नीषोमा चेति तद्वीर्यं वां। यदमुष्णीतमवसं प
णिं गोः। अवातिरतं भृथयस्य शेषः। अविंदतं ज्योतिरेकं बहुभ्यः। अग्नीषोमाविमं सु मे
ग्नीषोमा हविषः प्रास्थितस्य॥१०॥ जभारद्योऽग्ने रूपस्थ उपक्ष्यंतो बद्धधानो याद्मा
नः समुद्रे अंहसः प्रास्थितस्य॥७॥ ॥ अहमस्मि प्रथमजा ऋतस्य। पूर्वं देवेभ्यो
अमृतस्य नाभिः। यो मा ददाति स इदेवमावाः। अहमन्नमन्नमदंतमद्मि। पूर्वमग्ने
पि दहत्यन्नं। यत्तो हास्सा ते अहमुत्तरेषु। व्यात्तमस्य पशवः सुजंभं। पश्यंति धीराः प्र
रंति पाकाः। जहाम्यन्यं न जहाम्यन्यं। अहमन्नं वशमिच्चरामि॥२॥ समानमर्थं पर्येमि
भुंजत्। को मामन्नं मनुष्यो दयेत। पराके अन्नं निहितं लोक एतत्। विश्वैर्देवैः पितृभि
र्गुप्तमन्नं। यदद्यते लुप्यते यत्परोप्यते। शततमी सा तनूर्मे बभूव। महांतौ चरू सकृ

ब्रा॰ द्वि॰

॥१००॥

दुधेनपयो। दिवंचपृश्निपृथिवींचसाकं। तत्संपिबंतो नमिनंति वेधसः। नैतद्भूयोभवति नोकनीयः॥२॥ अन्नं प्राणमन्नमपानमाहुः। अन्नंमृत्युं तमुजीवातुमाहुः। अन्नंब्रह्मणोजरसंवदंति। अन्नमाहुः प्रजननंप्रजानां। मोघमन्नंविंदतेअप्रचेताः। सत्यंब्रवीमिवधइत्सतस्य। नार्यमणंपुष्यतिनोसखायं। केवलाघोभवतिकेवलादी। अहंमेघस्तनयन्वर्षन्नस्मि। मामदंत्यहमद्म्यन्यान्॥३॥ अहंसदमृतोभवामि। मदादित्याअधिसर्वेतपंति। देवींवाचमजनयंतयद्वाग्वदंती। अनंतामंतादधिनिर्मितांमहीं। यस्यांदेवाअदधुर्भोजनानि। एकाक्षरांद्विपदांषट्पदांच। वाचंदेवाउपजीवंतिविश्वे। वाचंदेवाउपजीवंतिविश्वे। वाचंगंधर्वाः पशवोमनुष्याः। वाचीमाविश्वाभुवनान्यर्पिता॥ ॥४॥ सानोहवंजुषतामिंद्रपत्नी। वागक्षरंप्रथमजाऋतस्य। वेदानांमातामृतस्य नाभिः। सानोजुषाणोपयज्ञमागात्। अवंती देवीसुहवामेअस्तु। यामृषयोमंत्रकृतो

॥१०१॥

मनीषिणः। अन्वैच्छन्देवास्तपसाश्रमेण। तांदेवींवाचंहविषायजामहे। सानोदधातुसुकृतस्यलोके। चत्वारिवाक्परिमितापदानि॥५॥ तानिविदुर्ब्राह्मणायेमनीषिणः। गुहात्रीणिनिहितानेंगयंति। तुरीयंवाचोमनुष्यावदंति। श्रद्धयाग्निःसमिध्यते। श्रद्धयाविंदतेहविः। श्रद्धांभगस्यमूर्धनि। वचसावेदयामसि। प्रियंश्रद्धेददतः। प्रियंश्रद्धेदिदासतः। प्रियंभोजेषुयज्वसु॥६॥ इदंमउदितंकृधि। यथादेवाअसुरेषु। श्रद्धामुग्रेषुचक्रिरे। एवंभोजेषुयज्वसु। अस्माकमुदितंकृधि। श्रद्धांदेवायजमानाः। वायुगोपाउपासते। श्रद्धांहृदय्ययाकूत्या। श्रद्धयाहूयतेहविः। श्रद्धांप्रातर्हवामहे॥७॥ श्रद्धांमध्यंदिनंपरि। श्रद्धांसूर्यस्यनिम्रुचि। श्रद्धेश्रद्धापयेहमा। श्रद्धादेवानधिवस्ते। श्रद्धाविश्वमिदंजगत्। श्रद्धांकामस्यमातरं। हविषावर्धयामसि। ब्रह्मजज्ञानंप्रथमंपुरस्तात्। विसीमतःसुरुचोवेनआवः। सबुध्नियाउपमाअस्यविष्ठाः॥८॥ सतश्चयोनिमसतश्च

स्य

८

श्री॰ खि॰ सतश्च विवः॥ पिता विराजामृषभो रयीणां॥ अंतरिक्षं विश्वरूप आविवेश॥ तमर्कैरभ्यर्चंति

॥१०१॥ वत्सं। ब्रह्म संतं ब्रह्मणा वर्धयंतः॥ ब्रह्म देवानजनयत्। ब्रह्म विश्वमिदं जगत्। ब्रह्मणः

क्षत्रं निर्मितं। ब्रह्म ब्राह्मण आत्मना। अंतरस्मिन्निमे लोकाः॥९॥ अंतर्विश्वमिदं ज

गत्। ब्रह्मैव भूतानां ज्येष्ठं। तेन कोऽर्हति स्पर्धितुं। ब्रह्मन्देवास्त्रयस्त्रिंशत्। ब्रह्मन्नि

द्रप्रजापती। ब्रह्मन्ह विश्वा भूतानि। नावीवांतः समाहिता। चतस्र आशाः प्रचरंत्वग्न

यः। इमं नो यज्ञं ~~नयतु प्रजानन्~~ नयतु प्रजानन्। घृतं पिन्वन्नजरं सुवीरं॥१०॥ ब्र

ह्म समिद्भवत्याहुतीनां। आ गावो अग्मन्नुत भद्रमक्रन्। सीदंतु गोष्ठे रणयंत्वस्मे।

प्रजावतीः पुरुरूपा इह स्युः। इंद्राय पूर्वीरुषसो दुहानाः। इंद्रो यज्वने पृणते च शिक्ष

ति। उपेद्ददाति न स्वं मुषायति। भूयोभूयो रयिमिदस्य वर्धयन्। अभिन्ने खिल्ले निद॥११॥

धाति देवयुं। न ता नशंति न ता अर्वा॥२१॥ गावो भगो गाव इंद्रो म अच्छात्। गावः सो

मस्य प्रथमस्य भक्षः। इमा या गावः स जनास इंद्रः। इच्छामीद्धृदा मनसा चिदिंद्रं। यूयं गावो

मेदयथा कृशं चित्। अश्रीलं चित्कृणुथा सुप्रतीकं। भद्रं गृहं कृणुथ भद्रवाचः। बृहद्वो

वय उच्यते सभासु। प्रजावतीः सूयवसं रिशंतीः। शुद्धा अपः सुप्रपाणे पिबंतीः। मा व

स्तेन ईशत माघशंसः। परि वो हेती रुद्रस्य वृज्यात्। उपेदमुपपर्चनं। आसु गोषूपपृच्य

तां। उपर्षभस्य रेतसि। उपेंद्र तव वीर्ये॥२२॥ चरामि कनीयान्यामपि तावदानि यच्च

तां। उपर्षभस्य रेतसि। पिबंती षड्॥८॥ ॥ तासूर्याचंद्रमसा वि

सौ हवामहे विष्णो लोकाः सुवीरमर्वा पिबंती षड्॥

सौ हवामहे विश्वालोकाः सुवीरमर्वा। पिबंती षड्॥८॥

सौहवामहे। तेजो वसुमद्राजतो दिवि। सामात्माना चरतः सामचारिणा। ययोर्व्रतं

श्वाप्तं मामहत्। तेजो वसुमद्राजतो दिवि। सामात्माना चरतः सामचारिणा। ययोर्व्रतं

न ममे जातु देवयोः। उभावंतौ परियात अम्यी। दिवो न रश्मींस्तनुतो व्यर्णवे। उभा भुव

ती भुवना कविक्रतू। सूर्या न चंद्रा चरतो हतामती। पती द्युमद्विश्वविदा उभा दिवः। सूर्या

उभा चंद्रमसा विचक्षणा॥१॥ विश्ववारा वरिवोभा वरेण्या। ता नो वतं मतिमंता महिव्रता।

ब्रा·द्वि·८ विश्व वयरी प्रतरणा तरंता। सुवर्विदा दृशये भूरिरश्मी। सूर्याहि चंद्रा वसुत्वेषदर्शता।
मनाश्विनो युधानु व रतो नु संदिवं। अस्यश्रवो नद्यः सप्त बिभ्रति। द्यावाक्षामा पृथिवीद
॥१०२॥ र्शतं वपुः। अस्मे सूर्याचंद्रमसा भिचक्षे। श्रद्धेक मिंद्र चरतो विचर्तुरं ॥४॥ पूर्वापरं चर
तो माययैतौ। शिशू क्रीडंतौ परियातो अध्वरं। विश्वान्यन्यो भुवनाभिचष्टे। ऋतूं रन्यो
विदधज्जायते पुनः। हिरण्यवर्णाः शुचयः पावका यासां राजा। यासां देवाः दि
वेनमा चक्षुषा पश्यत। आपो भद्रा आदित्यश्यामि। नासदासीन्नो सदासीत्तदानीं
नासीद्रजो नो व्योमा परो यत्। किमावरीवः कुह कस्य शर्मन् ॥१॥ अंभः किमासी
द्गहनं गभीरं। न मृत्युरमृतं तर्हि न। रात्र्या अह्न आसीत्प्रकेतः। आनीदवातं स्व
धया तदेकं। तस्माद्धान्यन्न परः किंचनास। तम आसीत्तमसा गूढमग्रे प्रकेतं। सलि ॥१०२॥
लं सर्वमा इदं। तुच्छेनाभ्वपिहितं यदासीत्। तमसस्तन्महिना जायतैकं। काम

स्तदग्रे समवर्तताधि ॥४॥ मनसो रेतः प्रथमं यदासीत्। सतो बंधुमसति निरविंदन्। हृदि
प्रतीष्या कवयो मनीषा। तिरश्चीनो विततो रश्मिरेषां। अधः स्विदासी३ दुपरि स्विदासी३
त्। रेतोधा आसन्महिमान आसन्। स्वधा अवस्तात्प्रयतिः परस्तात्। को अद्धा वेद क इ
ह प्रवोचत्। कुत आजाता कुत इयं विसृष्टिः। अर्वाग्देवा अस्य विसर्जनाय ॥५॥ अथा
को वेद यत आबभूव। इयं विसृष्टिर्यत आबभूव। यदि वा दधे यदि वा न। यो अस्याध्यक्षः
परमे व्योमन्। सो अंग वेद यदि वा न वेद। किं स्विद्वनं क उ स वृक्ष आसीत्। यतो द्यावा
पृथिवी निष्टतक्षुः। मनीषिणो मनसा पृच्छतेदु तत्। यदध्यतिष्ठद्भुवनानि धारयन्। ब्र
ह्म वनं ब्रह्म स वृक्ष आसीत्। यतो द्यावा पृथिवी निष्टतक्षुः। मनीषिणो मनसा विब्रवी
मि वः। ब्रह्माध्यतिष्ठद्भुवनानि धारयन्। प्रातरग्निं प्रातरिंद्रं हवामहे। प्रातर्मित्रा व
रुणा प्रातरश्विना। प्रातर्भगं पूषणं ब्रह्मणस्पतिं। प्रातः सोममुत रुद्रं हुवेम। प्रात

भा.ऋ्रि.८
॥१०३॥

र्जितं भगमुग्रं हुवेम। वयं पुत्रमदितेर्यो विधर्ता। आध्रश्चिद्यं मन्यमानस्तुरश्चित्॥ ॥२॥ रा
जा चिद्यं भगं भक्षीत्याह। भग प्रणेतर्भग सत्यराधः। भगेमां धियमुदवा ददन्नः। भग प्र णो
जनय गोभिरश्वैः। भग प्र नृभिर्नृवंतः स्याम। उतेदानीं भगवंतः स्याम। उत प्रपित्व उत म
ध्ये अन्हां। उतोदिता मघवन्सूर्यस्य। वयं देवानां सुमतौ स्याम। भग एव भगवां अ
स्तु देवाः॥५॥ तेन वयं भगवंतः स्याम। तं त्वा भग सर्व इज्जोहवीमि। स नो भग पुरएता भ
वेह। समध्वरायोषसो नमंत। दधिक्रावेव शुचये पदाय। अर्वाचीनं वसुविदं भगं नः। र
थमिवाश्वा वाजिन आवहंतु। अश्वावतीर्गोमतीर्न उषासः। वीरवतीः सदमुच्छंतु भद्राः।
घृतं दुहाना विश्वतः प्रपीना यूयं पात स्वस्तिभिः सदा नः॥७॥ विचक्षणा विचतुरं
ग्रामंन्वाधिविसर्जनाय ब्रह्मवनं ब्रह्मसवृक्ष आसीत्तु रश्मिर्देवाः प्रपीना एकं च॥१॥ ॥॥१०२॥
पीवोन्नांतेसुक्रासः सोमो धेनुमिंद्रस्तरस्वान्छुचिमादेवा यातु सूर्यो देवीमुहमस्मि

तां सूर्याचंद्रमसा नव॥१॥ ॥ पीवोंनामग्ने त्वंपारया नाधृष्यः शुचिंनु स्तोमं विश्वयं
माणो दिवो रुक्मो नं प्राणमंनं तां सूर्याचंद्रमसा नवसप्ततिः॥७१॥ ॥ओम्॥ ॥
॥छ॥ ॥छ॥ ॥छ॥ शाके १७०१ म्हवंग नामसंवत्सरे आश्विन कार्तिक शुक्लतृ
तीया इंदुवासरे इदं पुस्तकं देवधरोपनामक अनंतेन लिखितं॥ श्रीओंकारेश्वरार्पणमस्तु॥
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया॥ यदि शुद्धमशुद्धं वा मम दोषो न विद्यते॥१॥
तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबंधनात्॥ मूर्खहस्ते न दातव्यं एवं वदति पुस्तकं॥२॥
ग्रंथसंख्या ५८७ पांचशे सत्तेत्याकीस॥६०॥७३॥५०॥८॥८५॥२४॥ ६६॥७१॥ छ ॥

ब्रा॰ द्वि॰ ८

॥२४॥

॥ इति ब्राह्मण द्वितीयाष्टकः समाप्तः ॥ छ ॥

॥२४॥

[OrderDescription]
,CREATED=18.09.19 11:27
,TRANSFERRED=2019/09/18 at 11:51:06
,PAGES=102
,TYPE=STD
,NAME=S0001873
,Book Name=M-255-BRAHAMAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF

FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,